# NYAYAPADMAM

OF

SRI VENKATADHVARI

**Dr. M. E. ARAVAMUDAN**
Vyakarana, Mimamsa, Vedanta Siromani,
SikshaSastri, Vidyavaridhi,
Vedaparayanamdar
Tirumala Tirupati Devasthanams
Tirupati

T.C.S.NARAYANATATAYAARYA PUBLICATIONS
Tirupati
2000

**NYAYAPADMAM**
**of**

**SRI VENKATADHVARI**

Copies : 1000

First Edition : 2000

Copyrights reserved

**Price: Rs. 60/-**



**This book is published with the financial assistance of**
**TIRUMALA TIRUPATI DEVASTHANAMS, Tirupati under their sc**
**"Aid to publish religious books"**

copies can be had from :
Sri. M. E. ARAVAMUDAN,
**138, Kesavayanagunta,**
**Tirupati.**

Laser Typesetted and printed at
**BHUVANSRI GRAPHICS**
15/123 G.S.Mada Street, Tirupati.
INDIA Ph: 26507 (08574)

अग्निहोत्रम् सोमयाजी तिरुमलै चतुर्वेद
शतक्रतु श्रीमन्नारायणार्यमहादेशिकः 3



श्रीमच्छ्रीशैलवंश्यादनघ गुणनिधेः नीलमेघाख्यसूरेः
तातात्स्वीयादवाप्त श्रुतिशिखतयुगं साङ्गविज्ञानपूर्णम् ।
श्रीवासात्तातसूरेः निजपितृसहजादाप्तमन्त्रप्रधानम्
श्रीमन्नारायणाख्यं शतमखकुलजं भावये यायजूकम् ॥

श्रीस्वामिनां दिव्य चराणारविन्दयोः सप्रश्रयं सश्रद्धं ग्रन्थममुं समर्पयति

श्रीः

रङ्गेन्द्रं वृषशैलेशं हस्तीशं यदुशेखरम् ।
लक्ष्मीहयमुखं रामं ससीतं च नमाम्यहम् ॥

वाजिग्रीवपरावतारमनघं श्रीशैलवंशोद्भवम्
श्रीनारायणयज्वमुख्यविबुधं शास्त्रार्थपारङ्गतम् ।
तद्वंशान्वितदेवनाथसुधियं विद्याधिदेवं
तत्पादाश्रितरेणुशेखरशिराः विभुम् संसेविषीयाऽनिशम् ॥

कौण्डिन्यवंशसंभूतं नानाशास्त्रविशारदम् ।
वन्दे श्रीवीररघ्वीशं द्राविडाम्नापारगम् ॥

साङ्गध्यनसम्पन्नं मीमांसाद्वयसागरम् ।
श्रीश्रीनिवासात्मजं वन्दे देवनाथार्यसद्गुरुम् ॥

कौण्डिन्योवकुलारण्यक्षेत्री श्रीराघवात्मजः ।
अपर्याप्तामृतोदासः ध्यात्वा तान् रमते सदा ॥

शास्त्ररत्नाकर, तर्कवाचस्पति, दर्शनसार्वभौम, महामहोपाध्याय
प्रो एन्. एस्. रामानुजताताचार्यः
प्रथमकुलपतयः
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः

# आमुखम्

प्रख्यातवैभवाः वेंकटाध्वरि नामानः कविचक्रवर्तिनः विश्वगुणादर्श-चम्पूनाम्नि काव्ये विशिष्टाद्वैतसिद्धान्तस्थापकाचार्यान् श्रीमद्वेदान्तदेशिकानधिकृत्य एवमवर्णयन् --

नानाम्नायपरिश्रमं कलयतां नास्त्येव शास्त्रेषु धीः
सत्योरप्युभयोस्तयोर्न सुलभा सा ह्यक्षता साहिती ।
अप्येतासु सतीषु नास्ति विनयो नाचारभक्तिक्षमा-
चातुर्यः स च सा च सा च स च ताश्चालम्ब्यखेलन्त्यमून् ॥

इति। अनेकेषु वेदेषु अध्ययनाध्यापनादिपरिश्रमं कुर्वतां न्यायमीमांसादिशास्त्रेषु प्रतिष्ठिता बुद्धिर्न भवति। वेदविज्ञानशास्त्रविज्ञानयोः सतोरपि साहित्यविज्ञानं सुलभं न भवति। सत्स्वपि वेदशास्त्रसाहित्यविज्ञानेषु विनयः आचारः भगवद्भागवतभक्तिः क्षमा चातुरी च कर्तव्याकर्तव्यकुशलतारूपा दुर्लभाः। सर्वेऽप्येते वेदान्तदेशिकमाश्रित्य खेलन्ति क्रीडन्ति इति। अत्र दुर्लभतया वर्णिताः सर्वेऽपि गुणाः वस्तुतः एवंवदतः वेंकटाध्वरिणः अप्याश्रित्य खेलन्तीति वस्तुस्थितिरियम्। एतैर्महानुभावैरारचिताः काव्यशास्त्रादिमयाः विविधविषयकाः परं शतं ग्रन्थाः विलसन्ति। तेषु न्यायपद्मनामा मीमांसाग्रन्थोऽन्यतमः ।

अत्र बहवो विचाराः नूतनविषयकाः अदसीयवैभवप्रकाशकाः निबद्धा इत्यूह्यते। परं तु अस्माकं दौर्भाग्यवशात् त्रिचतुरा विचारा एवात्र उपलभ्यन्ते, सम्पूर्णस्य ग्रन्थस्यानुपलम्भात्।

तत्र आदौ सोमेन यजेत इति वाक्यं यागविधायकम् उत यागोद्देशेन द्रव्यविधायकमिति विचार्यत इति प्रतिज्ञाय अधिकारवाक्येन यागस्य प्राप्तिसंभवात् तदनुवादेन सोमरूपं द्रव्यं विधीयते इति उपक्रम्य आपदेवस्वीकृतविशिष्टविधिपक्षं न्यायप्रकाशे तदुक्तयुक्तीनां विस्तरेणानूद्य खण्डनपूर्वकं दूषयांबभूवुः। तन्मध्ये अत्रेदमवधेयम् इत्यादिना पञ्चविधाः विधिप्रकाराः विभज्य प्रदर्शिताः। तथा च ज्योतिष्टोमेन स्वर्गकामो यजेत इति वाक्यमुत्पत्त्यधिकारविधिद्वयात्मकम् उद्भिदा यजेत पशुकाम इतिवत्। तद्वाक्योत्पन्नयागानुवादेन सोमेन यजेत इति वाक्यं सोमद्रव्यरूपगुणविदायकमिति पूर्वपक्षः प्रापितः। सिद्धान्तस्तु - यदि फलवाक्य एव स्वर्गोद्देशेन यागविधिः तदा सत्यामेव फलकामनायां तस्यानुष्ठेयतया कामनायाश्च कादाचित्कत्वेन प्रतिवसन्तं तदनुष्ठानानुपपत्तेः वसन्ते वसन्ते ज्योतिषा यजेत इति वीप्सावगतं नित्यत्वं विरुध्येत। प्रत्युत तत्र कर्मान्तरमेव विधातव्यं स्यादिति महद् गौरवमापद्येत। तथा च तद्भिया सोमवाक्य एव मत्वर्थलक्षणां विशिष्टविधिगौरवं चाभ्युपगम्य यागविधिरास्थेयः इत्यादिना निरूपितः। मध्ये खण्डदेवकृतकौस्तुभग्रन्थोक्तयुक्तीनामपि परिशीलनं कृतम्। तदनन्तरमेतद्विचारप्रसक्तानुप्रसक्त्या द्वितीयाध्यायोक्तशब्दान्तरादिहेतुककर्मभेदविचारः कौस्तुभादिनिष्कर्षपरिशीलनपूर्वकं स्वोपज्ञनूतनयुक्तिगर्भः विस्तरेण कृत इतीयमधुना उपलभ्यमानैतद्ग्रन्थरीतिः।

एकामेव मातृकामाश्रित्य संपादितत्वात् तत्र तत्र अशुद्धयः अवलोक्यन्ते। सावधानं ताः कालान्तरे शोधनीयाः। वेदाध्ययनसम्पन्नेन व्याकरणमीमांसावेदान्तशास्त्रज्ञेन मदन्तेवासिना श्रीमता आरावमुदन् महाशयेन संपाद्य प्रकाश्यमानमेनं ग्रन्थं दृष्ट्वा मीमांसकाः संतुष्टाः भवेयुरिति विश्वसिमि। ग्रन्थकारस्य चरितं ग्रन्थांश्च तदीयान अधि-कृत्य वक्तव्यं सर्वं संपादकेन उपोद्घाते उक्तमिति तत्र लेखनीं न व्यापारयामि इति शम्।

एन्. एस्. रामानुजताताचार्यः

* * *

**DR. V. KANNAN**
Professor of Mathematics
University of Hyderabad

# अभिनन्दनम्

अस्य न्यायपद्माभिधस्य ग्रन्थस्य रचयिता वेङ्कटाध्वरी कविलोके शास्त्रलोके च सुप्रसिद्धः। तस्य कुलं कालं ज्ञानं कर्म च प्रति संक्षेपेण वर्णनं साम्प्रतं साम्प्रतम्।

आत्रेयगोत्रभूषणस्यास्य वंशोद्भवाः अधुनाऽपि अस्तोकाध्वरि बिरुदेन व्यवह्रियन्ते। अरशाणिपालै नामक एतेषां ग्रामः काञ्चीक्षेत्रसमीपे वर्तते।

शताधिकप्रबन्धनिर्मातुरस्य वेङ्कटाध्वरिणः कालः १५९०-१६६० इत्यवगम्यते। श्रीवैष्णवाचार्यपरम्परायां विख्यातानामाचार्याणां वंशे स्वकीयजनिरभवदिति सगर्व प्रकटयत्ययम् -

" प्रख्यातः प्रणतार्तिहृद्गुरुरिति श्रीभाष्यकर्तुर्मुनिः
यो माहानसिकस्तदुक्तिरसिकः श्रीमान् स यत्राभवत्।
वंशे तत्र हि वादिहंस जलदाचार्यादिभिर्भूषिते "

इति स्वकीये विधित्रयपरित्राणाख्ये ग्रन्थे।

" पुरा किल भगवतो भाष्यकारस्य बहुष्वन्तेवासिषु अत्रिगोत्रतिलक श्रीकृष्णाचार्या माहानसिकं पदमधिगम्य द्वादशकृत्वः तत्सकाशादेव शारीरकं शास्त्रमधिचक्रिरे। अतो भाष्यकारश्च तानेव भाष्यसम्प्रदाय प्रथमगुरूनपि चकार। विद्यया जन्मना च तत्पौत्रजा रामानुजाचार्या "

इति कुमारवरदाचार्यो न्यासतिलकव्याख्यायां

" यो माहानसिको महान् यतिपते र्नीतश्च तत्पौत्रजान् आचार्यानिति "

इति श्रीवेदान्तदेशिको न्यासतिलके च इमावाचार्यौ कीर्तयतः। किडाम्बि आच्चान्, किडाम्बि अप्पुळ्ळार् इति तत्साम्प्रदायिकैः क्रमेण व्यपदिश्यमानाविमौ गुरू क्रमेण ' वेदान्तोदयन ' इति ' वादिहंसाम्बुवाह ' इति च जगद्विख्यातौ।

अस्य वेङ्कटाध्वरिणः पितामहः अप्पय्यगुरुरिति नामान्तरभाक् श्रीनिवासदीक्षितः।

"अस्तोकाध्वरकर्तुरप्पयगुरो रस्यैष विद्वन्मणेः " इति

" वाजपेयसर्वपृष्ठाप्तोर्यामादियाज्यात्रेयवंश मौक्तिकीभवदप्पयार्यः" इति

" श्रीश्रीनिवासेष्टि नः "

इति च प्रबन्धा बहुत्र प्रस्तूयमानः।

अस्य वेङ्कटाध्वरिणः पिता श्लेषयमकचक्रवर्ती ति पुत्रः श्रीरघुनाथदीक्षितकविः पूर्णो गुणैरेधते इति यज्वाऽभूत् रघुनाथदेशिकमणिः श्री श्रीनिवासेष्टनः इति चानेनैव कीर्तितः। अस्य वेङ्कटाध्वरिणः पितामहस्य मातुलः काञ्चीमण्डलमण्डनस्य मखिनः कर्णाटभूभृद्गुरोः तातार्यस्य दिगन्तकान्तयशसः इत्युक्तरीत्या विख्यात वैभवः पञ्चमतभञ्जनताताचार्यः।

एवमनेकधा ज्ञानानुष्ठानश्रेष्ठे वंशे लब्धजन्माऽसौ वेङ्कटाध्वरी स्वकृतिभिः तादृशस्य पण्डितकुलस्य महिमानं बहुधा व्यवर्धयत्।

एवमाभिजात्य जनित सात्विकाहङ्कारभूमिर्वेङ्कटाध्वरी तदनुगुण वैदुष्यभूषितोऽपि विरराज। न्यायव्याकरण मीमांसावेदान्तशास्त्राणि चतुश्शास्त्र-शब्दाभिधेयानि सर्वाण्यस्य वशे बभूवुः। तर्कवेदान्ततन्त्रव्याकृतिचिन्तकः इति स्वयमेवात्मानमाह । प्रत्येकस्मिन् शास्त्रे प्रौढग्रन्थनिर्माणसामर्थ्योररीकृत पाण्डित्यप्रकर्षोऽसौ। तद्यथा- मीमांसायां न्यायपद्ममिति प्रकरणग्रन्थोऽधुना प्रकाश्यमानः, विधित्रयपरित्राणमिति ग्रन्थः पूर्वमेव मुद्रितश्च। व्याकरणे यङ्लुक् प्रकाशिका, महाभाष्यस्फूर्तिरिति ग्रन्थौ, तर्कशास्त्रे मणिसारखण्डन मिति ग्रन्थश्च एतद्रचितत्वेन एतद्वंशीयैः परिगण्यते। एवं धर्मशास्त्रे च।

एतेषां सर्वेषां शिखरायतेऽस्य साहित्यग्रन्थनिर्माणचातुरी। एतद्विरचिता अनेके ग्रन्था अधुना नोपलभ्यन्ते। कथमसौ वेदाध्यायी यायजूकश्शास्त्रवैशारदस्सन्नेव कवितल्लजोऽपि भवितुं प्रभवतीति विस्मयास्पदम्। एतादृशा बहुमुखप्रतिभाशालिनो

लोकेऽतीव विरलाः। न हि सामान्येन वेदपरिश्रमः शास्त्रविचारशीलता वा कवनशक्ति सामानाधिकरण्यं भजते। वेङ्कटाध्वर्येव कवयति यथा-

नानाम्नायपरिश्रमं कलयतां नास्त्येव शास्त्रेषु धीः।
सत्योरप्युभयोस्तयोर्न सुलभा साह्यक्षता साहिती ॥

किन्त्वस्य सामान्य न्यायस्यापवादभूतोऽसौ महान्। अनेन विरचिताः काव्यनाटकग्रन्था अनेके नैकविधाश्च रसिकावर्जकास्तत्कीर्तिपताकायन्ते।

प्रासश्लेषादिभिरनितरसाधारणीं धोरणीमाश्रित्यासौ कविसाम्राज्ये प्रतिष्ठित-कीर्तिर्विराजत इति नात्युक्तिरियम्।

अस्य जीवितसम्बद्धाः कतिपयकथा जगति प्रथामुपगताः अस्य प्रासश्लेषप्रावण्यप्रावीण्यप्रकाशकाः। श्वासस्य रोधेऽपि प्रासस्य न रोधः इति तद्विषयिका काचनोक्तिः। कदाचित् कुटुम्बनिर्वहणशक्तस्य कस्यचन बन्धोर्मृतिकाले शरीर वहनाय पुरुषाणामभावेन निर्विण्णान् प्रति अद्याऽपि निर्वाहकः इति अर्थद्वयमवलम्ब्य तदुक्तिरभूदिति वदन्ति। एवं रीत्या ग्रन्थेभ्यो बहिर्भूता मुक्तकश्लोका अनेके श्रूयन्ते वेङ्कटाध्वरीयाः। सुरापगोदारजडावृताया मित्यारभ्य कश्चन श्लोकः गङ्गाजलपवित्रित काशीनगरस्य दुराचारतुरुष्कभूयिष्ठ वन्दवाशी नगरस्य च श्लेषवर्णनरूपकस्तेष्वन्यतमः। ईदृशानां चाटुश्लोकानां वहूनामत्र विस्तरेण प्रतिपादनमसाम्प्रतमिति दिङ्मात्रप्रदर्शनेनालम्।

असौ विस्तारकविरिति लक्ष्मीसहस्रादिभ्यः, मधुरकविरिति विश्वगुणादर्शादिभ्यः, आशुकविरिति मुक्तकश्लोकेभ्यश्च यथा निश्चीयते तथैवायं चित्रकविरपीति न केवलमेभ्य एव परन्त्वे तदीयादत्यद्भुतात् यादवराघवीयग्रन्थात् च अवगम्यते यत्र अनुलोमप्रतिलोमपठनतो युगपत् रामकृष्णयोश्चरित्रे वर्ण्येते।

श्रीवैष्णवसम्प्रदायेऽतीव श्रद्धालुरसौ।

त्रय्यन्तार्यगुरुः परो हयमुखः

इति स्वकीये लक्ष्मीसहस्रे वेदान्तदेशिकस्साक्षात् हयग्रीवावतार इति ख्यापयति। विश्वगुणादर्शे भगवद्रामानुज वेदान्तदेशिकविषयकाः केचन श्लोका भक्तिपरिवाहरूपाः।

श्रौतकर्मानुष्ठानेऽस्यातीवादरः। असौ यज्वेति नाम्नैव ज्ञायते। अस्य पिताऽपि यज्वेत्यनेनैव स्पष्टमुक्तम्। तथैवास्य पितामहः अनेककृत्वः अनेकप्रकारज्ञश्च श्रौतकर्माण्यनुष्ठाय यजनशील आसीदित्यपि अदोवाक्येनैव स्पष्टमवगम्यते। अनेकयूपस्तम्भाभिज्ञानं स्वग्रामस्य माहात्म्यापादकमिति स्वकाव्ये वर्णयति च वेङ्कटाध्वरी।

अधुना प्रकाश्यमानः ग्रन्थः न्यायपद्माभिधः मीमांसाशास्त्र प्रकरणग्रन्थः श्रीवेङ्कटाध्वरि प्रणीतः। अस्य संशोधकः श्री मधुरान्तकं तिरुमलै ईच्चम्बाडि आरावमुदाचार्यः। अस्य मातामहः अग्निहोत्री सोमयाजी नारायणताताचार्यः नावल्पाक्काभिजनः चतुर्वेदशतक्रतु बिरुद भूषित वंशभूषणम्। श्रौतमीमांसाव्याकरण-वेदान्तशास्त्रेषु निष्णाताः इमे आचार्यवराः। तत्सकाशात् बाल्ये वेदमधीत्य तदनुग्रहपात्रमभूदसौ आरावमुदाचार्यः। अनन्तरं व्याकरणशिरोमणि परीक्षामुत्तीर्णः ततःपश्चात् तिरुमल तिरुपति देवस्थाने वेदपारायणार्थं नियुक्त अनेकवर्षकालं भगवत्कैङ्कर्यं कुर्वन् विराजते। श्रीमधुरान्तकक्षेत्रे कोदण्डरामस्वामि देवालये कुलक्रमादागतोऽस्य अग्र्यतीर्थसत्कारः अद्यापि अनुस्यूतः। एतादृशरीत्या वंशतः विद्यातः कर्मतश्च श्रेष्ठोऽसौ मम पितृष्वसुः पुत्र इति साभिमानं अस्मिन् सद्ग्रन्थ प्रकाशन सन्दर्भे एवं मयाऽपि स्वल्पो भागो वोढः।

विपर्यासहीनाभिराम्नायगीर्भिस्सपर्यां हरेः श्रीनिवासस्य कुर्वन्।
अपर्याप्तपूर्वोऽमृतस्साधुरिन्धे ह्यपर्याप्तरुक्षुर्बुधानां समूहे ॥

इति

नावल्पाक्कम् यज्ञवराहदासः

(प्रो यन्. कण्णन्)

श्रीः

श्रीमते रामानुजाय नमः

# भूमिका

अयि भोः अनवरतमीमांसान्यायानुसंधानपरिपूतनिजान्तरङ्गाः, पङ्क्तिपावनपावनाः,मीमांसकपरिवृढाः, भवतां पुरस्तात् विलक्षणप्रतिभाभानुसमुल्लसितं अतिप्रौढनानाविधचर्चामकरन्दभरितं इदं न्यायपद्मम् नाम ग्रन्थरत्नं विद्वन्मनोरञ्जनं समुपस्थाप्यते। अस्य प्रणेता सुगृहीतनामधेयः तुण्डीरमण्डलान्तर्गतः अरशानिपाला भिधा ग्रामाभिजनः श्लेषयमकचक्रवर्ती यायजूकपरंपरागतः वेङ्कटाध्वरी। अस्य महिमा सुप्रसिद्धतरः । स्वयमेव च विश्वगुणादर्शोपक्रमे [१] तत्सुतस्तर्कवेदान्ततन्त्रव्याकृति-चिन्तकः। व्यक्तं विश्वगुणादर्शं विधत्ते वेङ्कटाध्वरी इति आत्मनः नानाप्रकारं वैदुष्यं कीर्तयति। विशंकटविशिखविताडनविघटितमकुटविह्वलविश्रवस्तनयविश्रमसमय-विश्राणनविख्यातविक्रम इति श्रीरघुवीरगद्यचूर्णिकायां यथा वि कारादिकमेव पदजातं श्रीमन्निगमान्तमहादेशिकै : संदब्धम्, तथा अयमपि कविः व्यक्तं विश्वगुणादर्शं विधत्ते वेङ्कटाध्वरी इति वकारादिकमेव पदजातं उपयुज्य श्लोकं रचितवान् । तत्सुतस्तर्कवेदान्ततन्त्रव्याकृतिचिन्तकः इत्यत्रापि तकारादिकमेव पदजातं विन्यस्तम् । एवं विचित्रशब्दार्थालंकारपरिपुष्टेषु अस्य श्लोके नैसर्गिकः अनुप्रासः भूयिष्ठं उपलभ्यमानः काव्यरसास्वादचणान् सहृदयान् नितरामावर्जयति। अदसीयकवितासु परिचितानां अन्तर्वाणिजनानां विदितचरमेवैतत्। एवं सरसकवितासागरान्तर्निमग्नोऽपि कविसार्वभौमोऽयं सर्वेषु शास्त्रेष्वपि अनितरसाधारणप्रज्ञाविशेषशाली व्यराजत। इतीदं

बहवः न विजानन्ति - पूर्वोपदर्शितान् तत्सुतस्तर्कवेदान्ततन्त्रव्याकृतिचिन्तकः इति अस्यैव कविश्रेष्ठस्य श्लोकेन इदं स्पष्टतरं ज्ञायते। अयं विद्वत्कविः अष्टोत्तरशतप्रबन्धनिर्माता इति वदन्ति। तीर्थयात्राव्याजेन समग्रां भारतभूमिं पर्यटन् अयं तत्र तत्र राजसभासु लब्धप्रतिष्ठैः विद्वद्वरेण्यैस्साकं वादकोलाहले अवतीर्णः विजयश्रीसमालिङ्गितः तत्र राजभिः सबहुमानं सत्कृतश्चेति ज्ञायते। अदसीयाः कृतयः सर्वाः अद्यत्वे नोपलभ्यन्ते। उपलभ्यमानाश्च कृत्स्नशः न मुद्रणं प्रापिताः। वाचकमहाशयानां उपकाराय एतत्प्रणीतान् काव्यनाटकशास्त्रग्रन्थान् अस्माभिस्समुप-लब्धान् नामतो निर्दिशामः --

काव्यनाटकग्रन्थाः -

| | |
|---|---|
| १. यादवराघवीयम् | मुद्रितम् |
| २. उत्तरचम्पूः | मुद्रितम् |
| ३. वरदाभ्युदयः (हस्तिगिरिचम्पूः) | मुद्रितम् |
| ४. आचार्यपञ्चाशत् (वेदान्तदेशिकस्तोत्रम्) | मुद्रितम् |
| ५. श्रवणानन्दः | मुद्रितम् |
| ६. सुभाषितकौस्तुभः | मुद्रितम् |
| ७. प्रद्युम्नानन्दनाटकम् | मुद्रितम् |
| ८. श्रृंगारदीपिकाभाणः | अमुद्रितम् |
| ९. सुभद्रापरिणयः (अंकद्वयमेव लभ्यते) | मुद्रितम् |
| १०. विश्वगुणादर्शचम्पूः | मुद्रितम् |
| ११. लक्ष्मीसहस्रम् | मुद्रितम् |
| १२. श्रीनिवाससहस्रम् | अमुद्रितम् |
| १३. मुकुन्दविलासभाणः | अमुद्रितम् |
| १४. यथोक्तकारिकाभाणः | अमुद्रितम् |

व्याकरणग्रन्थाः

| | |
|---|---|
| १. महाभाष्यस्फूर्तिः | |
| २. यङ्लुक्प्रकाशिका | उभयमपि अद्यत्वे नोपलभ्यते |

तर्कग्रन्थाः

| | |
|---|---|
| १. व्युत्पत्तिबोधः | नोपलभ्यते |
| २. मणिसारखण्डनम् | नोपलभ्यते |

मीमांसाग्रन्थाः

| | |
|---|---|
| १. न्यायमकरन्दः | अमुद्रितम् |
| २. न्यायपद्मम् | अमुद्रितम् |
| ३. विधित्रयपरित्राणम् | मुद्रितम् |

धर्मशास्त्रग्रन्थः

| | |
|---|---|
| १. यतिप्रतिवन्दनखण्डनम् | अमुद्रितम् |

इतिहासः

| | |
|---|---|
| १. वाल्मीकिहृदयम् | नोपलभ्यते |
| २. रामायणव्याख्या | नोपलभ्यते |

एवं अस्माभिः उपलब्धानां एतद्विरचितानां नामानि निर्दिष्टानि। अनुपलब्धानि तु बहूनि तेषामपि गवेषणं सवैरेव विद्वद्भिः कर्तव्यम् इति प्रार्थयामः।

अनुपलब्धासु अदसीयकृतिषु नम्माल्वार् इति प्रसिद्धस्य शठकोपमुनेः द्राविडगाथात्मकस्य सहस्रसंख्याकस्य संस्कृतश्लोकात्मना परिवर्तनरूपः कश्चन प्रबन्धोऽपि अन्तर्भवति। तस्यैकदेशः कर्णपरम्परया अद्यावधि अनुवर्तते। संस्कृतग्रन्थजातचरितं[२] लिखितवद्भिः डा.यम् . कृष्णमाचार्यैः स्वग्रन्थे उल्लिखितो वर्तते। तद्यथा - तिरुवाय्मोळि चतुर्थशतकस्य प्रथमशतके प्रथमगाथा-

ओरु नायकमायोडवुलगुडनान्डवर् , करुनाय् कवर्न्दकालर्
चिदैक्क्यिपालनयर् पेरमाङुगाण इम्मैयिले पिच्चैताम् कोल्वर्.,
तिरु नाराणन् तान् कालं पेरच्चिन्दित्तुय्मिनो

इति अस्याः गाथायाः श्रीवेङ्कटाध्वरिविरचितः संस्कृतभाषात्मकः यथा-
" लोके पुष्कलमेकनायकतया ये शासितारो नृपाः श्यामाङ्गेन शुना प्रदष्टचरणास्ते भग्नभिक्षाघटाः अस्मिन् जन्मनि सार्वलौकिकतया भिक्षा मटन्ति स्वयम्। श्रीनारायण-पादसेवनरताः भो भोस्सयुर्ज्जीवताम् " इति।

अनेन विद्वत्कविना यदृच्छया कीर्तिताः कतिचन मुक्तश्लोका अपि अस्य अनितरसाधारणं प्रतिभाविशेषं आविष्कुर्वन्ति। कदाचित् यात्रावशात् देहलीनगरं प्रयातोऽयं तदानीं तत्रस्थं सम्राजं म्लेच्छराजं द्रष्टुकामः तदीयां सभां प्रविवेश। तत्रत्यैः अधिकृतैः म्लेच्छराजस्य पुरस्तात् स्थापितः स्वकीयं वैदुष्यं प्राचीकशत्। दृप्तेन म्लेच्छराजेन न यथावत् सम्मानितोऽयम्। अतिक्षुद्रं काचमेकं दत्वा प्रेषितः। तेन नितरां निर्विण्णहृदयोऽयं स्वकीयं खेदं अनाविष्कुर्वन्नेव सभायाः निर्गतः। राजसम्माननस्य सबहुमानं अङ्गीकारः आवश्यकः अन्यथा शिरच्छेदपर्यन्तं दण्डः समापतेत् तत्कालपरिस्थितिः तादृशी तेन सनिर्वेदं बहिर्गतोऽभूत् । सभाद्वारे अस्यागमनं प्रतीक्ष्य स्थितैः सुहृद्भिः किं लब्धम् इति पृष्टोऽयं शाकाय वास्याल्लवणाय वा स्यात् इति स्वमनोगतं भावं आविश्चकार। स्वेन कृतं तिरस्कारं अस्य कवेः महाक्लेशजनकं जानता म्लेच्छराजेन निगूढं एनमनुसर्तुं प्रेषितः कश्चन अधिकृतः सत्वरं राजसभां गत्वा इमां वार्तां राज्ञे निवेदयामास । अयं विषयः अनेन कविना न ज्ञातः। कतिचन राजपुरुषाः वेगेन समागत्य बलात् एनं राजसभां निन्युः। राज्ञः पुरस्तात् स्थापितोऽयं कोपाविष्टहृदयेन डिल्लीश्वरेण साधिक्षेपं पृष्टः त्वया एवं मदीयं सन्मानं धिक्कृतम्। तदर्थं त्वां दण्डयिष्यामि इति।

महति संकटे पतितोऽयं प्रत्युत्पन्नमतिः कवितल्लजः सविनयं विज्ञापयामास- महाराज, मदीयस्य श्लोकस्य चतुर्थः पाद एव भवता श्रुतः अन्यत् पादत्रयम् अस्ति तद्भवता न श्रुतम् तदपि विज्ञापयामि, श्रुत्वा यथेच्छं क्रियताम् इति राज्ञा सपदि आज्ञप्तोऽयं तत्पादत्रयमपि सभामध्ये उच्चैः उद्घुष्टवान् । तद्यथा-

डिल्लीश्वरो वा जगदीश्वरो वा
मनोरथं पूरयितुं समर्थः।
अन्येन केनापि नृपेण दत्तं
शाकाय वा स्याल्लवणाय वा स्यात्॥

इति । अस्य श्लोकस्य श्रवणेन सर्वे सदस्याः विस्मृता बभूवुः। डिल्लीश्वरोऽपि प्रसन्नहृदयः महान्तं द्रविणराशिं प्रदाय एनं सत्कृतवान्।

दक्षिणभारते उत्तरार्काड् मण्डले वन्दवाशी नामकं उपमण्डलं वर्तते। एतत्कवेः जन्मभूमिः अरसाणिपालग्रामः तस्य सन्निहितः वन्दवाश्यां म्लेच्छराजानामाधिपत्यं तदा बभूव। असकृत् कार्यवशात् वन्दवाशीगमनं अस्य कवेः प्रसज्येत । जलस्य अत्यन्तदौर्लभ्यं तत एव हेतोः सर्वत्र विस्रगन्धदूषितं नरकतुल्यं तन्नगरं इत्थं एकेन मुक्तश्लोकेन अयं कविः वर्णयामास । तद्यथा-

सुराप गोदारजडावृतायां
विप्रप्रभाहृद्यवनाश्रितायाम्।
वसन्ति काश्यामिव वान्दवाश्यां
पुन र्न तेषां नरकावकाशः॥

इति । अस्मिन् पद्ये वन्दवाश्याः काश्याश्च सादृश्यं प्रतिपादयति श्लेषयमकचक्रवर्ती वेङ्कटाध्वरी। पूर्वार्धे विद्यमानयोः द्वयोः विशेषणपदयोः श्लेषः कल्पितः । वन्दवाशी काश्योः साम्यं ज्ञायते। सुराणामापगा = गंगा, तस्याः उदारेण जलेन आवृता काशीनगरी। विप्राणां प्रभायाः = ब्रह्मवर्चसस्य, हृद्यानि = मनोहराणि यानि उद्यानवनानि तैः आश्रिता च काशी। तत्र वसतां नरकानुभव क्लेशो नास्ति काश्यान्तु मरणान्मुक्तिः इति प्रसिद्धेः। इदमेका योजना अपरा तु वन्दवाशीविषया ये सुरां पिबन्ति ते सुरापाः = ये गां दारयन्ति ते गोदाराः गोघ्ना इति यावत् । सुरापाश्च गोदाराश्च सुरापगोदाराः इति द्वन्द्वः । तथाविधैः जडैः आवृता नगरी वन्दवाशी। जडैरित्यत्र डलयोरभेदः । विप्राणां प्रभां ये हरन्ति ते विप्रप्रभाहृतः , तथाभूतैः यवनैः आश्रिता च वन्दवाशी। तत्र ये वसन्ति तेषां

पुनरपि नरकावकाशो नास्ति। किं कारणं नरकापेक्षयापि अत्यन्तजुगुप्सिता भयावहा च वन्दवाशी नगरी। तत्रत्यान् भगवान् यदि नरके क्षिपति तदा ते वन्दवाश्यपेक्षया नरकं लघुतरं मन्येरन् तस्मात् ईश्वरः तान् नरकेनैव प्रक्षिपति। इत्थं पूर्वार्धोक्तविशेषणद्वयसाम्येन नरकप्रसक्तिराहित्ये न च काशीवन्दवाश्योस्साम्यं कविना चमत्कारेण प्रदर्शितम्।

अस्य विद्वत्कवेः क्रिस्तोः पश्चात् १५९० आ १६६० पर्यन्तमिति ज्ञायते। सुगृहीतनामधेयस्य विद्वत्कवेः वक्रोक्तिकुशलस्य नीलकण्ठदीक्षितस्यापि अयमेव कालः। एवं विधानां विद्वद्वरेण्यानां बहूनां तत्र तत्र प्रादुर्भावात् अयं कालः दक्षिणभारतस्य सुवर्णकालः इति वक्तुं शक्यते।

न्यायपद्माभिधः प्रकृतग्रन्थः पूर्वमीमांसाविचारात्मकः। अयं ग्रन्थः पूर्वमीमांसासूत्रानुसारेण आदितः आन्तं निर्मितवन्तः स्यादिति अभ्यूह्यते परं तु इदानीं समुपलभ्यमानो भागः पूर्वमीमांसाशास्त्रस्य द्वितीयाध्याय द्वितीयपादमात्रसंबन्धिनो विषयान् विमृशति।

अद्यत्व इव तस्मिन् काले न सौलभ्यं ग्रन्थानां अयस्मय्या लेखिन्या तालपत्रेषु अक्षरशः विलिख्य श्रद्धालवः विद्वांसः ग्रन्थान् ररक्षुः।

एवं विधे समये प्रादुर्भूतोऽयं विद्वत्कविः नानादेश्यानां विदुषां ग्रन्थान् उपलभ्य तदन्तःप्रविश्य निपुणतरं विमर्शं कृतवान्। अनितरसाधारणं अस्य शेमुषीसमुन्मेषं प्रकटयतीदम्। पूर्वमीमांसाग्रन्थकारेषु खण्डदेवमिश्राः प्रसिद्धतराः स्वस्मात् प्राचीनान् सर्वानेव ग्रन्थान् निर्दयं खण्डयामासुः ते। अत एव खण्डदेवः इति तेषां प्रसिद्धम् इत्यपि वक्तुं शक्यम् तदीयमभिप्रायम् अनायासेन अयं विद्वत्कविः तत्र तत्र दूषयति।

खण्डदेवमिश्राणां प्रियशिष्यः शंभुभट्टोऽपि भाट्टदीपिकाव्याख्यायां स्वाचार्याभिप्रायं तत्र तत्र दूषयन्नेव गच्छति। विमर्शाप्रवृत्तस्य स्वस्य समुचितयुक्तिभिः आचार्यमतदूषणं न दोषाय इति स एव लिखति।तद्यथा -

यद्यप्यत्र गुरोः कृतावपि मयाप्युद्भाव्यतेकाचना-<br>
संभूतिस्तदपि प्रचारचतुरे नैषा पुरो भागिता।<br>
किं तु क्ष्मापतिलकाः कुशाग्रधिषणाः सिद्धान्तबद्धादरा<br>
मद्वाक्यं परिहृत्य तत्कृतिमलंकुर्वन्ति यं मे मतिः॥

तद्वदेव अयमपि विद्वत्कविः तेषामभिप्रायं उपपत्तिभिः तत्र तत्र दूषयति। पूर्वमीमांसाव्यख्यानावगाहमानानां विचाररसिकानां विद्वद्वरेण्यानाम् अमृतास्वादतुल्योऽयं ग्रन्थः। अयं विषयः वाचकमहाशयैः एतद् ग्रन्थावलोकनेन स्पष्टतरं ज्ञायतैव।

ग्रन्थस्य संक्षिप्तरूपत्वात् तदन्तर्गतानां विषयाणां पुनरप्यत्र निरूपणं पिष्टपेषण-तुल्यं स्यादिति एतावति अस्माभिः उपरम्यते।

वाचकमहाशयानां सौकर्याय अनुबन्धचतुष्टयम् अत्र संयोजितमस्माभिः।

१. कारिकाणामकाराद्यनुक्रमेण सूची

२. अधिकरणानां सूची

३. वेदवाक्यानां सूची

४. ग्रन्थकर्तॄणां नामानि

प्रकृतग्रन्थमातृकापरिचयः

अस्य ग्रन्थस्य मातृका तालपत्रात्मिका एकैव मद्रपुर्यां अडयार् हस्तलिखितमातृकालये उपलभ्यते। चिरन्तनी मातृकेयं भग्नपत्रभागा, क्रिमिजग्धा च वर्तते। अस्याः तत्रत्योऽकसंकेतः संख्या - २९८ इति। अस्याः कागजपत्रेषु प्रत्यादर्शोऽपि सम्पादितस्तत्रैव वर्तते। अस्याङ्कसङ्केतः संख्या टि. आर्. १२५ इति। मातकायाः अद्वितीयत्वात् क्रिमिजग्ध भग्नपत्रभागत्वाच्च तदवलम्बनेन ग्रन्थस्यास्योद्धारो अतिक्लेशावहो अस्माकमासीत्। तत्र तत्र विनष्टानां वाक्यभागानां पूरणं अत्यावश्यकं संवृत्तम् यथामति पूरिताश्च ते अस्माभिः। असाध्येषु स्थलेषु समुचितचिह्नप्रदर्शनमात्रेण विरता वयम्। प्रौढानां मीमांसकपरिवृढानां सकाशे अयं भारः समर्प्यते।

आचार्यानुग्रहेण विना ईप्सितं कर्म न सिद्ध्यति। परन्तु तेषां अनुग्रहेनैव पुंसां सर्वं सम्पत्स्यते। अतः मम स्वरूपसत्तां ज्ञानसत्तां च परमकृपया अनुगृहीतवद्भ्यः कर्मज्ञानयज्ञे स्वजीवनं यापितवद्भ्यः अस्मत् मातामहमहाभागेभ्यः चुलुकीकृत-सर्वशास्त्रेभ्यः नावल्पाक्कम् अग्निहोत्रं सोमयाजी श्री नारायणतातयार्यमहादेशिकेभ्यः अनन्तकोटि नतिपूर्वकं कृतज्ञतां समर्पयामि।

अध्ययनारम्भणेन, वेदार्थसङ्ग्रहादि कालक्षेपादि प्रदानेन मम जन्मसाफल्यम् कृतवद्भ्यः नानाशास्त्रपारङ्गतेभ्यः देशिकदर्शनधुरन्धरेत्यादि बिरुदभाग्भ्यः अनन्त-कल्याणगुणगणपूर्णेभ्यः अय्या श्री देवनाथतातयार्यमहादेशिकेभ्यः अनन्तप्रणामपुरस्सरं धन्यवादान् व्याहरामि।

एतत् शोधप्रबन्धनिर्माणे मम मार्गदर्शकेभ्यः मीमांसाशास्त्रनिष्णातेभ्यः, वेदभाष्यश्रौतादिग्रन्थदक्षेभ्यः, आत्मगुणपरिपूर्णेभ्यः नावल्पाक्कम् अग्निहोत्रं श्री देवनाथताताचार्येभ्यः सनति हार्दिकीं कृतज्ञतां निवेदयामि।

अधुना ग्रन्थस्यामुष्य आमुख प्रदानेन मां अनुगृहीतवद्भ्यः चतुश्शास्त्रनिष्णातेभ्यः आत्मगुणपरिपूर्णेभ्यः तर्कविद्यावाचस्पतिभ्यः नावल्पाक्कं श्री शठकोपरामानुजताताचार्येभ्यः सप्रणामं धन्यवादान् वितरामि।

अस्य ग्रन्थकर्तुः वेङ्कटाध्वरेः चरितं सङ्ग्रहेण सम्पूर्णेन च प्रमाणपुरस्सरं निरूप्य अभिनन्दन प्रदानेन च उपकृतवद्भ्यः नावल्पाक्कं श्री यज्ञवराहाचार्येभ्यः (Prof. V. Kannan) धन्यवादान् व्याहरामि।

एतद् ग्रन्थसम्पादनकर्मणि मां बहुषुविषयेषु प्रोत्साह्य सर्वविधसाहाय्यं कृतवते तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठे विशिष्टाद्वैतवेदान्तविभागे व्याख्यातृपदं विराजमानाय चिरञ्जीवि कूत्तप्पाक्कं चक्रवर्तिराघवाय वेदोक्तमङ्गळाशासनपूर्वकं सधन्यवादं आशिषः वितरामि।

ग्रन्थस्यास्य प्रकाशनायार्थिकमनुदानं दत्तवद्भ्यः तिरुमल तिरुपति देवस्थानाधिकारिभ्यः, ग्रन्थममुं साधुमुद्रितवद्भ्यः भुवन्श्री ग्राफिक्स् श्री श्रीकान्तमहोदयेभ्यश्च नामं नामं धन्यवादं समर्पयामि।

श्रीपदपुरी
प्रमाथिनामसंवत्सरः
४-३-२०००

विदुषां वशंवदः
आरावमूदन्

श्रीः

श्रीमते रामानुजाय नमः

# न्यायपद्मम्

(वेङ्कटाचार्यविरचितम्)

सोमलतया प्रसिद्धो नित्यो ब्रह्मादिभाषितशुभांगः ।
वितरतु सर्वमभीष्टं ज्योतिष्टोम इव वेङ्कटाधीशः ॥
रमाकान्तं समानम्य वेङ्कटाचार्ययज्वना ।
सूर्यालोकाप्तसौरभ्यं न्यायपद्मं वितन्यते ॥

****************

सोमेन यजेत इति वाक्यं यागविधायकम् , उत यागोद्देशेन द्रव्यविधायकं वा इति विचार्यते।

तत्राधिकारवाक्येन यागस्य प्राप्तिसंभवात् - द्रव्यं तदनुवादेन सोमवाक्ये विधीयते।

एवं सति अत्र मत्वर्थलक्षणा प्रसज्येत। विशिष्टविधितोपङ्गं न चापतति गौरवम्-सोमेन यजेतेत्यत्र मत्वर्थलक्षणामाश्रित्य सोमवता यागेनेष्टं भावयेत् इत्येवं विशिष्टविधिं स्वीकुर्वन्ति।तदयुक्तम् - लक्षणाया एव दोषत्वात्। विशिष्टविधाने गौरवाच्च। ततश्च ज्योतिष्टोमेन स्वर्गकामो यजेत इति वाक्ये यागो विधीयते।

सोमेन यजेतेत्यत्र यजिना तद्वाक्यविहितं यागमनूद्य सोमलक्षणकं द्रव्यं साधनत्वेन विधीयते। अग्निहोत्रवाक्यप्राप्तहोमानुवादेन - दध्नाजुहोति इत्यत्र दधिलक्षणं द्रव्यमिव। एवं च सति सोमशब्दस्य न मत्वर्थलक्षणा नापि विशिष्टविधिगौरवम्। अग्निहोत्रं जुहोतीति वाक्यस्य संभवत्युत्पत्तिविधित्वम्। तत्र फलश्रवणात् ज्योतिष्टोमवाक्यस्य तु न यागोत्पत्तिविधित्वसंभवः। तत्र फलश्रवणेन अधिकारविधेः तस्य च उत्पत्ति-विधित्वानुपपत्तेः। एवं च ततो यागस्याप्राप्तत्वात् अगत्या सोमवाक्ये मत्वर्थलक्षणा विशिष्टविधिगौरवे सोढव्ये इति चेन्न।

उद्भिदा यजेत पशुकामः इत्यादेरिव एकस्यैवात्र उभयविधित्वसम्भवेन ज्योतिष्टोमवाक्याद्यागप्राप्तेरप्रत्यूहतया सोमवाक्ये लक्षणागौरवयोः स्वीकर्तुं अयुक्तत्वात्।

न च ज्योतिष्टोमवाक्ये यागस्य करणत्वेनैवावगतत्वात् कथं तदनुवादेन सोमवाक्ये साधनविधिः। करणस्य सतः साधनाकांक्षा विरहादिति वाच्यम्।

नासाधितं करण मिति न्यायेन ज्योतिष्टोमवाक्यावगतकरणत्वाक्षिप्तसाध्यरूपेण यागं अनूद्य साधनविधित्वसंभवात्।

अथ

विधाने वानुवादे वा यागः करणमिष्यते।
तत्समीपे तृतीयान्तः तद्वाचित्वं न मुञ्चति॥

इत्यभियुक्तोक्तेः। अनुवादवाक्येऽपि यागस्य करणत्वेनैव प्रतिपादनावश्यंभावात् गुणविधिपक्षेऽपि मत्वर्थलक्षणा दुवरिति चेन्न।

तर्हि दध्यादिवाक्येऽपि दध्यादिपदानां मत्वर्थलक्षणाप्रसंगः। नचेष्टापत्तिः। तथासति चित्रया यजेत पशुकामः इत्यत्रापि उद्भिदा यजेत इत्यत्रेव मत्वर्थलक्षणयैव

गुणविधिपक्षनिराससंभवेन वाक्यभेदेन तन्निरासप्रयासवैफल्यात् चित्राधिकरण-विरोधापत्तिः। तर्हि विधाने वेति वार्तिकस्य का गतिरिति चेत् - अत्राहुः --

अग्निहोत्रवाक्यानालोचनदशायां गुणविधावपि धात्वर्थस्य करणत्वशङ्कायां गुणपदं मत्वर्थलक्षणेत्यभिप्रायः इत्युक्तं वार्तिके। यदा तु अग्निहोत्रं जुहोतीति होमविधायकं वाक्यान्तरमालोच्यते, तदा होमस्य वाक्यान्तरेणैव विहितत्वात् तदुद्देशेन गुणमात्रं विधीयत इत्यलोचनान्न मत्वर्थलक्षणा इति। अत एवोक्तं - पार्थसारथिना आधाराग्निहोत्राधिकरणे फलतो गुणविधिः अयं न प्रतीतिः इति।

यद्वा एतद्वार्तिकम् अधिकारविध्यभिप्रायं उद्भिदा यजेत[३] इत्यादौ हि यागो विधीयतां वा, अतः उत्पत्तिवाक्यसिद्धौ अनूद्यतां वा उभयथापि [४]करणत्वेनैवान्वयात् तृतीयान्तस्य तद्वाचित्व [५]मन्वयानुपपत्तेरिति। वस्तुतस्तु वाजपेयेन स्वाराज्यकामो यजेतेति विधिवाक्ये वाजं वा एषोऽवरुरुत्सते। यो वाजपेयेन यजेत इत्याद्यनुवादवाक्ये च यागस्य करणत्वमेवेष्यते वाजपेयादिपदानां तृतीयान्तानां उभयत्रापि याग-नामत्वमेवेत्यभिप्रायः। इत्युक्तं वार्तिके इति दिक्। तस्मात् ज्योतिष्टोमवाक्य-प्राप्तयागोद्देशेनैवोपदिश्यते। सोमवाक्ये सोमद्रव्यं लक्षणा गौरवाभ्यां **तथैव** तान्त्रिकैरभ्युपेतम्।

अत्र आपदेवः

यद्यपि यागोद्देशेन सोमद्रव्यविधौ न मत्वर्थलक्षणापि विशिष्टविधिगौरवम्। तथापि ज्योतिष्टोमवाक्यस्याधिकारविधित्वेनैव यागोत्पत्तिविधित्वासम्भवात्, ततो यागस्याप्राप्तया सोमवाक्ये लक्षणा गौरवे स्वीकृत्याप्यगत्या यागविधानमभ्युपगम्यते। अत एव यदाग्नेयादिवाक्यैरुत्पन्नानां यागानां दर्शपूर्णमासवाक्ये फलविशेषसम्बन्धो विधीयत इत्यभ्युपगतम्।

ननु दर्शपूर्णमासवाक्यस्य यागोत्पत्तिविधित्वं न सम्भवति । यदाग्नेयादिवाक्येष्वनेकगुणश्रवणेन दर्शपूर्णमासवाक्यप्राप्तयागानुवादेनानेकगुणविधाने वाक्यभेदापत्त्या गुणविधित्वासम्भवेन तेषां वैयर्थ्यापत्तेः। अतः यदाग्नेयदिवाक्यानां उत्पत्तिविधित्वं दर्शपूर्णमासवाक्यस्याधिकारविधित्वमाश्रितम्। इह तु सोमवाक्ये

अनेकगुणश्रवणाभावेन वाक्यभेदाभावात् ज्योतिष्टोमवाक्यप्राप्तयागानुवादेन गुणविधौ न किञ्चिद्बाधकमिति। कथमत्र लक्षणागौरवक्लेशानुभवः, न चाधिकारिविधित्वमुत्पत्तिविधित्वविरुद्धम् । उद्भिदा यजेतेत्यादिरधिकारविधेस्सत एव उत्पत्तिविधित्वस्वीकारादिति चेन्न। यद्यपि सोमेन यजेतेत्यत्र न वाक्यभेदः । तथापि ज्योतिष्टोमवाक्ये कर्मस्वरूपे तस्य फलसम्बन्धे च विधीयमाने गौरवलक्षणो वाक्यभेदो अस्त्येव। सोमेन यजेतेत्येतद्वाक्यविहितकर्मणः फलसम्बन्धमात्रविधाने लाघवात् उद्भिदा यजेतेत्यादौ तु वचनान्तराभावेनागत्या तदाश्रयणम्, न च सोमेन यजेतेत्यत्रापि कर्मस्वरूपे गुणे च विधीयमाने वाक्यभेदस्स्यादिति वाच्यम्। तत्र गुणविधेरार्थिकत्वात् इह तु श्रूयमाणेन विधिना विधातव्यमिति दृढो गौरवलक्षणो वाक्यभेदः।[६]

तदाहुः -

श्रौतव्यापारनानात्वे शब्दानामतिगौरवम्।
एकोक्त्यवसितानां तु नार्थाक्षेपो विरुद्ध्यते॥

इति। न चैवमपि सोमवाक्ये लक्षणैव दोषः इति वाच्यम्। पददोषाद्वाक्यदोषस्य जघन्यतया ज्योतिष्टोमवाक्ये वाक्यदोषात्मकवाक्यभेदपरिहाराय सोमवाक्ये पददोषात्मकलक्षणायाः स्वीकर्तुमुचितत्वात्। अत एव जातपुत्रः कृष्णकेशो अग्नीनादधीत इत्यत्राधानानुवादेन जातपुत्रत्वकृष्णकेशत्वविधाने वाक्यभेदात्पदद्वयेनावस्थाविशेषो लक्ष्यत इत्युक्तम्।

किञ्च सोमेन यजेतेत्यत्र यागविधाने श्रुत्यर्थलाभः। गुणविधाने तु वाक्यार्थविधानम्। तस्मात् ज्योतिष्टोमेनेत्येतदधिकारविधिरेव।

अपि च यत्र कर्मणो रूपमुपलभ्यते तत्रैव कर्मस्वरूपविधिस्स्वीकार्यः यागस्य रूपं च द्रव्यदेवतात्मकम्। तथा च अधिकारवाक्ये द्रव्यं देवता वा न श्रूयते इति न तत्र यागविधिरुपपद्यते। सोमवाक्ये तु द्रव्यलक्षणरूपश्रवणात् तत्रैव यागविधिस्स्वीकार्यः। न चैवमग्निहोत्रं जुहोतीत्ययमपि उत्पत्तिविधिर्न स्यात्, रूपाश्रवणात्। रूपवत्सु दध्यादिवाक्येष्वेव होमविधिस्स्यात् । तथा चाधाराग्निहोत्राधिकरणविरोधस्स्यादिति वाच्यम्। अग्निहोत्रवाक्ये कर्मविध्यनङ्गीकारे तस्यानर्थक्यमेव स्यात्। दध्यादि कर्मविधौ

उत्पत्तिशिष्टदध्यवरुद्धे होमः पयः प्रभृतिद्रव्याणां विधानसम्भवेन पयसा जुहोतीत्यादिषु कर्मान्तरविधानावश्यम्भावेनानेकादृष्टकल्पना च स्यात्। अतस्तत्रागत्यारूपश्रवण-रहितेष्वग्निहोत्रवाक्ये होमविधिस्स्वीकृतः। तथा च सति दध्यादिद्रव्याणां सर्वेषा-मप्युत्पन्नशिष्टत्वात् अग्निहोत्रहोमे विकल्पेन निवेशसम्भवेन नानेकादृष्टकल्पना। प्रकृते तु रूपवति सोमवाक्ये यागविध्यङ्गीकारेऽप्यधिकारवाक्यस्य सम्बन्धविधायकत्वेन वैयर्थ्या-भावादनेकादृष्टकल्पना प्रसक्त्यभावाच्च किमर्थं रूपरहितेऽधिकारवाक्ये याग-विध्याश्रयणम्। तस्मात् सोमेन यजेत्यत्र उत्पत्तिविधिरिति समाधत्ते। तच्चिन्त्यम् - सोमेन यजेतेत्यत्र उत्पत्तिविधित्वङ्गीकारेऽपि सोमवता यागेन इष्टं भावयेत् इत्येत वाक्यार्थो वर्णनीयः। उत्पत्तिविधिनिरूपणप्रस्तावे हि त्वयैवमुक्तम् - कर्मस्वरूपबोधको विधिरुत्पत्तिविधिः। उत्पत्तिविधौ च कर्मणः करणत्वेनैवान्वयः साध्यत्वेनान्वये साध्यस्य साध्यान्तरान्वयायोगेन अधिकारवाक्यावगतफलसम्बन्धो न स्यात्। करणत्वेनत्वन्वये होमेनेष्टं भावयेत् किं तदिष्टमित्याकांक्षायां फलविशेषसम्बन्धो घटते। न चोत्पत्तिविधाविष्टवाचकपदाभावेन कर्मणा इष्टं भावयेदिति कथं वाक्यार्थ इति वाच्यम्। विधिश्रुतेरेवेष्टबोधकत्वात्। सा हि पुरुषार्थे पुरुषं प्रवर्तयन्ती कर्मणः फलसम्बन्धमात्रं बोधयति, तस्मात् युक्तमुत्पत्तिविधौ कर्मकरणत्वेनान्वेतीति, एवं च सोमवाक्यस्य उत्पत्तिविधित्वपक्षेऽपि तत्र कर्मस्वरूपफलसम्बन्धयोर्बोधनीयतया त्वदुक्तगौरवलक्षणो वाक्यभेदो भवत्येव। मत्वर्थलक्षणाविशिष्टविधिगौरवे अधिके। ज्योतिष्टोमवाक्यस्य उत्पत्तिविधित्वपक्षे तु त्वदुक्तरीत्या गौरवलक्षणवाक्यभेदमात्रम्। न तु मत्वर्थलक्षणाविशिष्टविधिगौरवे ज्योतिष्टोमवाक्ये तयोः प्रसक्त्यभावात्। सोमवाक्येऽपि सोमेन यागं कुर्यादिति गुणविधित्वाङ्गीकारेण न तयोः प्रसक्तिः। ततश्चैकस्य गौरवलक्षणवाक्यभेददोषस्य परिहाराय प्रागुक्तदोषत्रयग्रस्तः सोमवाक्यस्य उत्पत्तिविधित्वपक्षः परीक्षकैरादर्तु न युक्तः। एतेन वाक्यदोषपरिहाराय पददोषभूता लक्षणा स्वीकार्या जातपुत्रः कृष्णकेशो अग्नीनादधीतेत्यादौ तथा दर्शनादिति निरस्तम्। लक्षणास्वीकारेऽपि त्वदुक्तगौरवलक्षणं वाक्यभेदापरिहारात्। जातपुत्र इत्यादौ तु अवस्थाविशेषलक्षणायां वाक्यभेदपरिहारलाभात्। वस्तुतस्तु जातपुत्र इत्यादौ

अर्धमन्तर्वेदिमिनोति, अर्धबहिर्वेदीत्यादौ च विध्यावृत्तिलक्षणावाक्यभेदभिया लक्षणा स्वीकृता । इह तु यागेन स्वर्गं कुर्यादिति एवमेकस्या एवक्कचनव्यक्तेरभ्युपगमात्, विध्यावृत्त्यभावेन वाक्यभेदाभावात् तत्परिहाराय लक्षणास्वीकार इति रिक्तं वच :।

किं च प्रत्युत लक्षणापरिहारायैव गौरवं सोढव्यम्। निषादस्थपत्यधिकरणे निषादपदे लक्षणापरिहाराय निषादस्य सङ्करजातीयस्य क्रतूपयुक्तविद्यासम्बन्धकल्पना-गौरवात्[७]। सोमपदलक्षणापरिहारायाधिकारवाक्ये यागस्वरूपविधानप्रयुक्तं गौरवमपि सोढव्यम्। अपि च सोमवाक्योत्पत्तिविधित्ववादिनामपि अधिकारवाक्ये यागविधिरभ्युपेयते। तत्रानुपादेयफलाश्रवणात् तथाचावश्यकत्वात् तस्यैव यागविधौ तात्पर्यमस्तु न तु सोमवाक्यस्य। तस्य दध्यादिवाक्यवत् गुणविधित्वेनाप्युपपत्त्या तत्र यागविधेरनावश्यकत्वात्।

यत्तु सोमवाक्ये विशिष्टविधिगौरवं न दोषः गुणस्य श्रूयमाणेन विधिना विहितत्वाभावात् विशेषणविधेरार्थिकत्वादिति। तदुक्तम् - श्रूयमाणस्य विधेः विशिष्टविधिस्थले गुणे व्यापाराभावेऽपि विशेषणविधयाऽक्षेपकत्वं गौरवमिति। अत एव तद्व्यपदेशाधिकरणे श्येनेनाभिचरन्यजेतेत्यत्र श्येनवता यागेन वैरिवधे भावयेत् इति विशिष्टविधिरस्त्विति पूर्वपक्षे श्येनतद्वत्ताभेदेन उपमानोपमेयभावात् यथा वै श्येन इत्यादि वाक्यशेषाद्यनुपपत्त्यभावेन गौरवमेव दूषणमुपन्यस्तम्। विशिष्टविधिनिबन्धन-गौरवभीत्यात्यन्तजघन्यां गौणीवृत्तिमपि समाश्रित्य श्येनपदस्य नामता समाश्रिता।

अत एव [८]सन्निधानविशेषादसम्भवे तदङ्गाना मिति तात्तीर्याधिकरणे दृति नवनीताज्यं भवती त्यत्र प्रधानभूतश्येनयागार्थत्वेन सोमस्थाने दृति नवनीतत्वविशिष्टाज्यविधिपूर्वपक्षे, विशिष्टविधिगौरवन्निरस्य आज्यानुवादेव दृति नवनीतत्वलक्षणगुणविधित्वमङ्गीकृत्य अङ्गेष्वाज्य एव दृतिनवनीतत्वविशेष इति सिद्धान्तितम्, एवं च तत्र विशिष्टविधिगौरवभयात् अभ्यर्हितप्रधानार्थतापि परित्यक्ता।

यत्तु किञ्चेत्यादि तदपि न युक्तम्, मत्वर्थलक्षणादोषादिविशिष्टविधिगौरवात् फलसामान्यसम्बन्धविधिप्राप्ताच्च गौरवादत्र विप्रकृष्टार्थविधानमपि संगृह्यते। यूपस्य

स्वरुमित्यत्रह्येवमेव समाश्रितम् यूपस्यस्वरुं करोति, स्वरुणा पशुमनक्ति इति हि कर्मकरणेतिकर्तव्यताविशिष्टा स्वरुभावना विधीयते, तत्रोत्पन्नश्च स्वरुः स्वरुणा पशुमनक्ति इत्यनेन विनियुज्यते इति पूर्वपक्षं प्रापय्य, विशिष्टविधिगौरवात् खादिरादिरूपकरणच्छेदनादिरूपेतिकर्तव्यतासमर्पको यूपशब्द इत्यङ्गीकारे मुख्यस्य यूपशब्दस्य लक्षणाप्रसङ्गाच्च स्वरुणा पशुमनक्ति इत्यनेनाञ्जनसाधनतया विहितस्य स्वरोरनुपात्तस्याञ्जनत्वायोगात्। अप्राप्तमुपादानं लक्षणया करोतिनानूद्य, मत्स्वरुमुपादत्ते तद्यूपादित्येवमुपादानरूपो विप्रकृष्टार्थे यूपस्य स्वरुं करोतीत्यत्र विधीयत इति सिद्धान्तितं चतुर्थे[१],स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् इत्यधिकरणे कुतश्च तत्र मुख्यलक्षणाविशिष्टविधिगौरवात्मकदोषद्वयभिया करोति शब्दे आदाने लक्षणामाश्रित्य यूपस्येति षष्ठ्याः पञ्चम्यर्थोपादानपरत्वक्लेशमप्यङ्गीकृत्य विप्रकृष्टार्थविधानं स्वीकृतम्।

सोमवाक्ये मुख्यलक्षणादिनिरुक्तदोषत्रयभिया लक्षणादिक्रियाक्लेशादिसंस्पृष्टं विप्रकृष्टार्थविधानं किमिति नाङ्गीक्रियते इति विस्मयामहे। यत्तु ज्योतिष्टोमवाक्ये यागस्यैव फलोद्देशेन विधानान्नवाक्यार्थविधानमित्युक्तम्, तदपि चिन्त्यम् - त्वयैवादौ सोमेन यजेतेत्येतद्वाक्यविहितकर्मणः फलसम्बन्धमात्रविधानात् लाघवम् अन्यथा कर्मस्वरूपस्य फलसम्बन्धस्य च विधानात् गौरवमित्युक्तवता तत्र यागस्यैव विधानान्नवाक्यार्थविधानमिति कथं कथ्यते फलस्यानुपादेयत्वेन तदुद्देशेन यागो विधीयत इति युक्तं वचः ततः प्राप्ताप्राप्तविवेकन्यायेन विधेः फलसम्बन्धमात्रपर्यवसानमिति लाघवोक्तिरपि युक्तेति चेत् हन्तैवं पदान्तरार्थभूतस्वर्गसम्बन्ध एव विधेः पर्यवसाना-ङ्गीकारात् अधिकारवाक्ये विप्रकृष्टार्थसम्बन्धविधानं तवाप्यापतति, तत्परिहाराय यागस्यैवाप्राप्तस्य तत्र विधानं स्वीकर्तुमुचितम्। लक्षणाविरहात्।

अपि चेत्यपि न पेशलम् फलविशेषश्रवणवति वाक्य एव यागस्य विधान-मुचितत्वात्। तथाहि -

विशिष्य फलसम्बन्धबोधाभावे हि कर्मणि।
न प्रवर्तयितुं शक्यो विधिना पुरुषौजसा॥
सोमवाक्ये सरूपत्वात् यदि यागविधिस्ततः।
विधेः प्रवर्तनात्वस्य निर्वाहो नाञ्जसा भवेत्॥

विशिष्यफलसम्बन्धो न हि तत्रावगम्यते।
अतः प्रवर्तनात्वं तु सम्यक् साधयितुं विधेः॥
नीरूपेऽपि स्वर्गकामवाक्ये यागविधिर्मतः।
विधि स्पृशो भावनायाः भाव्यकांक्षा भवेत्पुरः॥
इतिकर्तव्यताकांक्षा पश्चादेवोपधायते।
अतो विशिष्य भाव्याप्तिबोधके यागचोदना॥
अयुक्तानन्तराकांक्षा गौरवाद्भाव्यबोधके ।
तस्माद्यागविधिर्वाक्ये स्वर्गकामपदान्विते॥

अत्रेयमवधेयम् -

१) फलेतिकर्तव्यताकरणप्रतिपादकपदोपेते वाक्ये यागकरणकभावनाविधिः प्रकृष्टतमः। तत्र कर्मकरणेतिकर्तव्यतारूपाणामप्यङ्गानामवगमेन भावनायाः परिपूर्णत्वात् यथा - वायव्यं श्वेतमालभेत भूतिकामः, ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः, ऐन्द्रं चरुं निर्वपेत् पशुकामः इत्येवमादिषु।

२) यत्र फलविशेषकरणप्रतिपादकपदयोगः तत्र तद्विधिः प्रकृष्टतरः तत्र भावनायाः प्रथमाकांक्षितफलविशेषसम्बन्धावगमात्। यथा उद्भिदा यजेत पशुकामः, वाजपेयेन स्वाराज्यकामो यजेत, श्येनानभिचरन् यजेत इत्येवमादिषु।

३) यत्र तु द्रव्यदेवतालक्षणद्वयरूपप्रतिपादकपदयोगः, न तु फलविशेषपदश्रवणं तत्र तद्विधिः प्रकृष्टः। प्रथमाकांक्षितफलविशेषानवगमेऽपि इतिकर्तव्यताभूतयागीय-रूपद्वयावगमात्। यथा - यदाग्नेयो अष्टाकपालो अमावास्यां च पौर्णमास्यां च अच्युतो भवति इत्येवमादिषु।

४) यत्र तु अन्यतररूपमात्रवाचिपदश्रवणं तत्र तद्विधिर्जघन्यः यागशरीरपौष्कल्यानवगमात्। यथाधिकारवाक्यस्य उत्पत्तिविधित्वमात्र पक्षे सोमेन यजेत इत्यत्र।

५) यत्र फलेतिकर्तव्यतावाचिनोः द्वयोरपि पदयोरश्रवणं तत्र तद्विधिः जघन्यतरः। यथा - अग्निहोत्रं जुहोति इत्यादौ । तत्र प्रथमाकांक्षितस्य भाव्यविशेषस्य पश्चादाकांक्षितायाः इतिकर्तव्यतायाश्चानवगमात्।

अत्र द्वितीयपर्वणि रात्रिसत्रस्थले अर्थवादतो विपरिणामेन फलसम्बन्धकल्पनात् तत्र तद्विधेरीषदपकर्षः। विश्वजिता यजेतेत्यत्र तु तस्मिन्नेव पर्वणि ततोऽपि किञ्चिदपकर्षः फलपदस्याध्याह्रियमाणत्वात्। तृतीये पर्वणि आज्येन शेषं संस्थापयेत् इत्यत्र ईषदपकर्षः। देवतापदस्य तत्राश्रुततया अनुषक्तेन पात्नीवतपदेनैव देवतालक्षणरूपसमर्पणात्। एवं चात्र यागकरणकभावनाविधेः प्रकृष्टतरपर्वसम्भवेन जघन्यपर्वाश्रयणमन्याय्यमिति - न सोमवाक्ये यागकरणकभावनाविधिः। किन्तु ज्योतिष्टोमवाक्य एवेति सूरयः सूक्ष्ममीक्षन्ताम्।

किञ्च सोमेन यजेते त्यस्य गुणविधित्वेन सम्भाव्यमानतया तत्र न यागविधित्वनिश्चयः । अधिकारवाक्ये तु अनुपादेयफलश्रवणात् यागविधानमावश्यकम्। अत एव सवनीययागस्य प्रचारप्रकर्षाख्यगुणश्रवणवत्यौपवसथ्यवाक्येनोत्पत्तिः किन्तु आश्विनं गृहीत्वा तिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोतीति वाक्ये अनुपादेयकालश्रवणात् सांख्ये अहन्येवोत्पत्तिरिति तृतीये[१०] स्थापितम्। अपि च यदि स्वर्गकामवाक्ये यागस्य नोत्पत्तिः तदा तस्य आनर्थक्यमेव यागस्वरूपस्य सोमवाक्यादेव प्राप्तेः स्वर्गसम्बन्धस्य च सर्वेभ्यः कामेभ्यः ज्योतिष्टोमः इति सर्वकामवाक्यादेव प्राप्तेः। न चोभाभ्यामपि वाक्याभ्यां स्वर्गसम्बन्धविज्ञान-मभ्युदयकारीति स्वीकारात् न तद्वैयर्थ्यमिति वाच्यम् एवमप्यप्राप्तफलसम्बन्धप्रापकत्वा-भावेनातीव सार्थक्यानुपपत्तेः। यथा वैयर्थ्यभिया रूपश्रवणरहितस्याप्यग्निहोत्रवाक्यस्य कर्मोत्पत्तिविधित्वं तथा ज्योतिष्टोमवाक्यस्याप्यनर्थप्रायत्वपरिहारायोत्पत्तिर्विधित्वं अवश्याश्रयणीयमिति एतेन अधिकारवाक्यस्य उत्पत्तिविधित्वे यागस्वरूपे फलसबन्धे च विधिव्यापारादतिगौरवमिति दूषणं निरस्तम्। स्वर्गसम्बन्धस्य सर्वकाम्यवाक्यादेव प्राप्ततया एतद्विधेस्तत्प्रापणभारवाहितत्वाभावादिति पूर्वपक्षः।

अत्र ब्रूमः -

[११]कर्मभेदस्तु पादे अस्मिन् लक्षणार्थो निरूप्यते। कर्मभेद इह भावनारूपक्रियाभेदः। स एव लक्षणार्थः। नत्वपूर्वभेदः तस्य भावना भेदानुनिष्पादित्वात् अपूर्वस्याननुष्ठेयत्वेनाविधेयत्वाच्च। शब्दान्तरेणानुरन्धकधातुरूपप्रकृत्यर्थभेदनिबन्धनः प्रत्ययार्थस्य भेदो निर्धार्यते न तु धातुभूतस्यापूर्वस्यभेद इत्याहुः।

तत्र शब्दान्तरस्थले अनुरञ्जकधात्वर्थभेदस्य स्फुटत्वात् भावनाभेदमात्रस्य सुखेन प्रतिपादयितुं शक्यतया सूचीकटाहन्यायेन प्रथमं शब्दान्तरादेव भेदो निरूप्यते। ज्योतिष्टोमेन स्वर्गकामो यजेत, हिरण्यमात्रेयाय ददाति, दाक्षिणानि जुहोति, आज्यैस्स्तुवते, प्रउगं शंसति इत्यादि श्रूयते। तत्र चिन्त्यते। किमेकैव भावनायागदानादिसकलप्रकृतधात्वर्थानुरक्ता विधीयते उत प्रतिधात्वर्थभावना भेदः इति।

प्रतिधात्वर्थं भावनाभेदाभ्युपगमे अनेकापूर्वकल्पनापत्या गौरवप्रसंगः क्रियमाणां फला केव स्य त्यस्य क्वापि वाक्ये अश्रवणात्।

एकेन वाक्येन भावनाविधौ तद्वाक्यश्रुतोत्पत्तिशिष्टधात्वर्थावरोधावश्यंभावात्। तस्यामेवोत्पन्नशिष्टधात्वर्थान्तरो[१२] पसंहारासम्भवात् न भावनैक्यसम्भावनापि। ततश्च गौरवस्याप्रामाणिकत्वात् प्रतिधात्वर्थं भावना भेद इति चेत्।

अत्र वदन्ति - स्वर्गकामवाक्ये स्वर्गोद्देशेन शुद्धभावनाविध्यङ्गीकारेण तदनुवादेन सोमादिवाक्यैः गुणविशिष्टधात्वर्थविध्यभ्युपगमात्। यागदानादीनां सर्वेषामेवोत्पन्न-शिष्टतया गुणन्यायानवतारान्न भावनैक्यविघातः। न च फलवाक्येऽपि यज्युपादानान्नायं शुद्धभावनाविधिरिति वाच्यम्। विशिष्टविधिगौरवापत्याफलवाक्यश्रुतस्य यजेर्विधेय-समर्पकत्वाभावेन, प्रत्ययप्रयोगसाधुत्वाय प्रयुज्यमानस्यावयुत्या वा अनुवादकत्वेन वा प्रकृतसकलधात्वर्थ................लक्षणार्थत्वेनोपपत्तेः। अतो गौरवस्य न प्रामाणिकत्वमिति।

अत्र नवीनाः

फलवाक्ये धात्वर्थाविवक्षया केवलभावनाविधिः अन्यत्र गुणविधिरित्ययुक्तम् विनिगमनाविरहात्। पदस्य एकप्रसरत्वेन फलवाक्यव्यतिरिक्तवाक्येषु फलवाक्योत्पन्न-भावनां प्रत्ययेनानूद्यप्रकृत्या तत्र धात्वर्थः करणत्वेन विधीयत इति कल्पनाया अत्यन्तायुक्तत्वाच्च। तस्मान्नेदं सामाधानम्। किन्तु सर्वेषां वाक्यानामेकवाक्यत्वा-भ्युपगमेन सर्वविशिष्टभावनाविधेस्सम्भवात् भावनैक्यं विहितमित्येव समाधिस्साधनीय इत्याहुः।

तच्चिन्त्यम् -

न तावद्विनिगमनाविरहः फलवाक्ये अनुपादेयश्रवणात् भावनाविधिरावश्यकः। वाक्यान्तरेषु तद्वाक्यावश्यंभावात् तदनुवादेन करणविधानं सम्भवतीति विनिगमकसत्वात्। कस्मिन् वाक्ये सर्वधात्वर्थ विशिष्टभावनाविधानमिति विनिगमकप्रश्ने वक्तव्यत्वात्। नापि पदस्य एकप्रसरत्वभङ्गो बाधकः। गौरवरूपबाधकवशात् [१३]पश्चावत्तैव वपा कार्या [१४]इत्यत्र त्वयाप्युक्तविनिगमकस्यैव शरणीकरणीयत्वात्। सर्वेषां वाक्यानामेक-वाक्यत्वाभ्युपगमेऽपि एकमेव वाक्यं तद्विधायकं इतराणि तु साधुत्वार्थानीति त्वयापि वक्तव्यत्वात्। [१५]नापि पदस्य एकप्रसरताभङ्गो बाधकः गौरवरूपबाधकवशात् पश्चावत्तैव वपाकार्येत्यादिष्विव तस्य कथञ्चित्समाधेयत्वात्। सर्वधात्वर्थविशिष्टभावनाविधिपक्षे धातुप्रयोग साधुत्वायैव तिङा प्रयोग इति वक्तव्यतया भूयसां तिङां आनर्थक्यापत्तिरिति तदपेक्षया पदैकप्रसरत्वभङ्गीकारस्य परत्वात् तथा सत्येव तेषामुद्देश्यसमर्पकतया सार्थक्यलाभात् बहूनां वैयर्थ्यपेक्षया स्वारस्यहानेरदोषत्वात्। न च तवापि फलवाक्यस्थयजेस्साधुत्वार्थकतया वैयर्थ्यमिति वाच्यम्। तवापि एकेनैव यजिना यागसमर्पकेन यज्यन्तरवैयर्थ्यतौल्यात्। बह्वानर्थक्यापेक्षया एकानर्थकस्यादोषत्वाच्च। तस्मात् सर्वेषामुत्पत्तिशिष्टत्वाभ्युपगमेन गुणन्यायावतारनिरासासंभवात् उत्पन्नश्शिष्टत्वमेवाभ्युपगम्यतन्निरासः कर्तव्यः।

ननु फलवाक्ये धात्वर्थविशेषावच्छिन्नैव भावनाविधातव्या न तु शुद्धा फलानुकूल व्यापारस्य लोकत एव प्राप्त्या तदात्मनोभावनायाः विधानवैयर्थ्यात्। किं च प्रत्ययानां

प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य नियमात् धात्ववच्छिन्नभावनैव प्रत्ययेनाभिधातव्या न तु केवला। अपि च यजेः प्रकृतसकलधात्वर्थोपलक्षणार्थत्वे च ज्योतिष्टोमपदस्य यज्यन्यत्र धात्वर्थेषु प्रवृत्तिनिमित्ताभावेन तन्नामत्वासंभवादन्वयप्रसंग इति चेत् - मैवम् - [१६]स्वर्गजन्यत्वे न तदनुकूलाव्यापारसामान्ये लोकतोवगतेऽपि तदुद्देश्यकस्य पुरुषनिष्ठयत्नव्यापारस्य नियोगतो अनाक्षेपात् तद्विधानोपपत्तेः किं चेत्यपि अकिञ्चित्करम्। वस्तुतः प्रत्ययस्य धात्वर्थान्वितभावनाभिधायित्वेऽपि धात्वर्थांशं प्रमाणान्तरप्राप्तमपहायविशेष्यमात्रविधेः पर्यवसानसंभवात् अपि चेत्यपि न यजेः प्रमाणान्तरानुरोधेन प्रकृतसर्वधात्वर्थपरत्वे निश्चिते तत्समानाधिकरणस्य ज्योतिष्टोमपदस्यापि एकदेशप्रवृत्तिनिमित्तेन [१७]सकलधात्वर्थनामत्वोपपत्तेः। तदेवं सर्वेषामुत्पत्ति शिष्टत्वान्न गुणन्यायेन भावनाभिदावकाशः।

अत एव भावनाया अपि प्रत्ययाभ्यासाद्भेद इति शंका निरस्ता। फलवाक्येतरवाक्यश्रुतानां प्रत्ययानां धात्वर्थविधानार्थमनुवादाभ्युपगमात्। अभ्यास-न्यायानवतारात्। नन्वेवमपि धातुभेदादाख्यातानि मिथश्शब्दान्तरमिति शब्दान्तरादेवाभ्यासं विना भेदः किं न स्यादिति चेन्न असिद्धेः । धातुभेदेऽपि भावनावाचिप्रत्ययभेदाभावात् । न चैवमपि धात्वर्थ रूपानुरञ्जकभेदादेव तद्भेदस्स्यात् अनुरञ्जकभेदादनुरज्यभेदस्य घटज्ञानपटज्ञानादौ दर्शनादिति वाच्यम्। एकस्मिन्नेव समूहालम्बनात्मकज्ञाने घटपटादीनामनेकेषां अवच्छेदकत्ववत् एकस्यामेव भावनाख्यकृतावनेकेषां धात्वर्थानां अवच्छेदकत्वोपपत्तेः। किं च भावनायाः प्रत्ययार्थत्वेन प्रधानत्वात् धात्वर्थानां च गुणभूतत्वात् न तद्भेदेन भावना भेदश्शक्यो वक्तुम्। न चैवं भावनाभेदे अपूर्वभेदस्स्यादिति प्रागुक्तं व्याहन्येत। भावनायाः अपूर्वं प्रति गुणभूतत्वेन गुणभेदस्य प्रधाना अभेदकत्वादिति कारकत्वात् क्रियमाणं, क्रियाभेदे फलभूतापूर्वभेदो युक्तः। धात्वर्थस्तु आख्यातेन क्रियार्थत्वेन प्रतिपाद्यमानायां भावनायां कारकमेव न तु फलम् न हि कारकभेदे क्रियाभेद इति वैषम्यमित्याहुः तस्मादेकैवभावनेति पूर्वपक्षः।

राद्धान्तस्तु -

अपर्यायधातुलिङ्गिताख्यातरूपाच्छब्दान्तरात् भावनाभेदस्तावत् अवश्यम्भावी अनुरञ्जकभेदादनुरज्यभेदस्य ज्ञानादौ दर्शनात्। यथा - विज्ञानं विषयता निरूपणाधीननिरूपणकं एवं भावनाया अपि धात्वर्थनिरूपणाधीननिरूपणकतया तद्भेदेन भेदः आवश्यकः न च समूहालम्बनस्य बहुविषयानुरक्तस्याप्यभेददर्शनात्। इहापि तथेत्युक्तमिति वाच्यम् तत्र सर्वेषां विषयाणाम् इन्द्रियसन्निकर्षरूपसामाग्रि अविशेषात् सर्वेषामेव सम्भवति ज्ञानानुरागः। अत्र तु नानाधात्वर्थानां सामग्रीपदश्रुतिलक्षणा [१८]समाना स्यात्। नापि धातोः विभक्तिः प्रत्ययः श्रूयते - येन यागदानादेस्सर्वस्यापि भावनान्वये वाक्यस्य प्रकरणस्यैव वा प्रमाणत्वे न तुल्यसामग्रीकत्वं स्यात्।

ननु [१९]अग्नीषोमाभ्यामित्यादिष्विव समुदिते............ उपरि एकप्रत्ययश्रवणे सत्येव सर्वेषामेकस्मिन् प्रत्ययार्थसम्बन्ध इति न निर्बन्धः। अग्नये दात्र इत्यादिपृथग्विभक्तिश्रवणस्थलेप्येककारकान्वयः दातृत्वगुणवदिहापि तथा सम्भवात्। किञ्च ददातीत्यादावपि भावनावाचिप्रत्ययश्रवणात् दानादेरपि पदश्रुतिरूपसाम्यविशेष अपि च सर्वधातुपृथक्कृतशुद्धप्रत्ययश्रवणाभावेऽपि फलवाक्ये प्रकृत्यर्थानुरक्तां भावनां विदधानो विधिः प्राप्ताप्राप्तविवेकेन भावनायामेव पर्यवस्यति। तदनुवादेन च वाक्यान्तरेषु धात्वर्थविधिरित्यभ्युपगमे न किञ्चिद्बाधकमिति कथं भावनाभेद इति चेन्न।

दातृशब्दात् विभक्तेः विशेषणविभक्तित्वे न साधुत्वार्थतया तत्र पृथक् प्रत्ययश्रवणेप्येककारकान्वयस्सम्भवति। धात्वर्थानां तु मिथो विशेषणविशेष्य-भावान्नेहतन्न्यायसम्भवः। किञ्चेत्यपि न दानादेः स्ववाक्यप्रतिपन्नभावनायां पदश्रुतिरूप-सामग्रीसत्त्वेऽपि यजति वाक्यश्रुतायां तस्यां यजेरिव तदभावेन सामग्रीतौल्याभावात् वाक्यप्रकरणान्यतरेणैव हि दानादेरस्तदन्वयो वाच्यः। तच्च श्रुतितो दुर्बलम्। न च दुर्बलस्याप्यविरुद्धस्य प्रबलबाध्यत्वायोगात् इह च एकस्य करणत्वेन निवेशः इतरस्याङ्गत्वेनेत्यविरोधोपपादनसम्भवात्। न श्रुत्या वाक्यादिबाध इति वाच्यम्, सर्वेषामेव भावनान्वये एकस्य करणत्वं इतरस्याङ्गत्वमित्यत्र विनिगमकाभावेन सर्वेषामेव करणत्वस्यैव वक्तव्यतया विरोधस्य दुर्वारत्वात्।

न च सर्वेषामपि समुच्चयेन करणत्वसम्भवात् करणत्वेन निवेशेप्यविरोध इति वाच्यम्, तथा सति यजेः करणत्वसिद्धार्थं धात्वन्तरार्थसापेक्षत्वेनासमर्थत्वात् समर्थाधिकारविहितप्रत्ययानुपपत्तिप्रसङ्गः।

अपि चेत्यपि न प्रकृतिप्रत्ययो प्रत्ययार्थं सह ब्रूतः इत्यनुशासनेन प्रत्ययस्य प्रकृतिं विना स्वार्थाभिधानासमर्थतया सोमादि वाक्ये प्रत्ययेन भावनामनूद्य प्रकृत्या धात्वर्थस्य विधातुमशक्यत्वात्। न च सोमादिवाक्येऽपि धात्वर्थविशिष्टभावनैव विधीयते विधिकटाक्षत्वप्राप्तेः धात्वर्थस्यैवेत्यभ्युपगच्छाम इति वाच्यम्। फलवाक्यमिव सर्वत्र भावनाविध्यवश्यम्भावे एकत्र शुद्धभावनाविधिः इतरत्र धात्वर्थविधिः इत्यत्र विनिगमकाभावेन तत्तद्वाक्येषु तत्तद्धात्वर्थविशिष्टभावनाविधानस्यैवावश्यकत्वात्। एवं च सोमवाक्यादेव यागविशिष्टभावनायाः प्राप्तत्वात् फलवाक्ये फलसम्बन्धमात्र विधानमिति लाघवम्। [२०]यतः सर्वोपलक्षणार्थत्वं ज्योतिष्टोमपदस्य एकदेश प्रवृत्तिनिमित्तकत्वं इत्यादिक्लेशाश्च नानुभा................फलवाक्यप्राप्तशुद्धभावनानुवादेन सोमादिवाक्ये सोमधात्वर्थरूपानेककारकविधौ वाक्यभेदस्स्यात्। न च सोमविशिष्ट-यागविधानादवाक्यभेदः, यागस्यापि कारकत्वाविशेषेण गुणविशिष्टगुणान्तरविध्ययोगवत्। गुणविशिष्टधात्वर्थविध्ययोगस्यापि तुल्यत्वात् इत्यपि कश्चित्। ननु सोमवाक्यप्राप्तयाग-विशिष्टभावनानुवादेन फलवाक्ये फलसम्बन्धमात्रविधानाल्लाघवमिति यदुक्तं तत् कथम्? तर्हि सोमवाक्ये विशिष्टविधिगौरवापातात्। अतः फलवाक्ये उद्भिदा यजेत पशुकामः इत्यादाविव फलोद्देशेन यागकारणकभावनाविधिः। सोमवाक्ये तु यागकर्मकभावनानुवादेन सोममात्र विधिरङ्गीक्रियताम्। न च पक्षद्वयेऽपि लाघवगौरवयोस्तौल्याद्विनिगमनाविरहः। सोमवाक्ये विशिष्टविधिस्वीकारे पक्षे मत्वर्थलक्षणादोषस्याधिकत्वादिति केचित् - अत्र कौस्तुभकारः - एवं सति फलवाक्ये दीक्षणीयादि प्राकरणिकयागानामेव राजसूयवत् फलसम्बन्धापत्या तदपेक्षया कर्मान्तरविधाने प्रमाणाभावः ज्योतिष्टोमपदस्य चोत्तरकालिकाङ्गत्वरूपसम्बन्धमादायैव सर्वपरत्वोपपत्तेः। न चेष्टापत्तिः, तथात्वे दीक्षणीयादि वाक्ये उत्पत्तिशिष्टद्रव्यावरोधे तत्र सोमविधानानुपपत्तौ सोमवाक्ये [२१]गुणन्यायेन सोमविशिष्टकर्मान्तरविधानस्यावश्यकत्वात्। अतश्च [२२]युक्तं चातुर्थिक-

न्यायेन सोमवाक्यविहितस्य सोमद्रव्यकयागस्यैव फलवाक्ये फलसम्बन्धविधि-रित्यवोचत्। तन्निगददोषम् -फलवाक्यस्य दीक्षणीयादिप्राकरणिक-यागसम्बन्धपरत्वे उक्तरीत्या सोमवाक्ये सोमविशिष्टकर्मान्तरविधानस्यैवावश्यकत्वात् पुनर्मत्वर्थलक्षणा पिशाचग्रासप्रसंगेन तद्भिया फलवाक्यस्य दीक्षणीयाद्यपेक्षया कर्मान्तरविधायकत्वस्यैव स्वीकरणौचितायात्। न च कर्मान्तरविधौ गौरवात् फलसम्बन्धपरत्वमेव स्यादिति वाच्यम्। फलसम्बन्धपरत्वपक्षे सोमवाक्ये कार्यान्तरविध्यवश्यम्भावस्य त्वयैवोक्तत्वात् ततश्च प्रकृतसर्वयागफलसम्बन्धपरत्वपक्षे फलोद्देशेन कर्मविधिपक्षे च दीक्षणीयाद्यपेक्षया कर्मान्तरविधानं समानम्। तत्राद्यपक्षे मत्वर्थलक्षणाप्रसंगात् अतो नैतदिह समाधानम्।

वस्तुतस्तु, यदि फलवाक्य एव स्वर्गोद्देशेन यागविधिः, तदासत्यामेव फलकामनायां तस्यानुष्ठेयतया कामनायाश्च कादाचित्कत्वेन प्रतिवसन्तमनुष्ठानानुपपत्तेः वसन्ते वसन्ते ज्योतिषा यजेतेति वीप्सावगमि तन्नित्यत्वं विरुध्येत। प्रत्युत तत्र कर्मान्तरमेव विधातव्यं स्यादिति महद्गौरवमापद्येत। तथा च तद्भिया सोमवाक्य एव मत्वर्थलक्षणां विशिष्टविधिगौरवं चाभ्युपगम्य यागविधिरास्थेयः। तत्र च कामनानुपापादानात् साधारण्येनैवोत्पन्नस्य यागस्य वसन्तवाक्येन नित्यत्वं फलवाक्येन च काम्यत्वमवगम्येत। यथा अग्निहोत्रं जुहोतीति साधारण्येनोत्पन्नस्य होमस्य यावज्जीववाक्येन नित्यत्वं स्वर्गवाक्येन च काम्यत्वम्। तद्वत् न चैवमप्येकस्यैव नित्यत्वकाम्यत्वे विरुद्धे इति वाच्यम्। प्रयोगभेदेनाविरोधात् न चैवं फलवाक्ये यागविधावपि प्रयोगभेदेनाविरोधोपपादनं किन्न स्यादिति वाच्यम्। तथा सति उत्पत्तिदशायामेव कामनाधीनत्वे नानित्यतयोत्पत्त्या तत्र नित्यत्वप्रतिपादनविरोधादिति युक्तमुत्पश्यामः एतच्च वस्तुगतिमवरुध्यैवोक्तम्[२३] सर्वथा। एकधात्वर्थलिङ्गितायां भावनायां धात्वन्तरार्थसम्बन्धानुपपत्तेः। अपर्यायधात्वर्थावरुद्धप्रत्ययान्तररूपात् शब्दान्तरात्सिद्धो भावनाभेद इति सम्प्रदायविदः। तथाह - कौस्तुभकारस्तु - भावना हि कृतिरूपा तस्याश्च धात्वर्थो विषयः कृतिविषयत्वमपि [२४]न ज्ञानविषयत्ववत् सिद्धपदार्थवृत्तिः अपि तु साध्यमात्रवृत्तित्वात् तज्जन्यत्वापरपर्यायम्। [२५]ततश्च फलवाक्यविहिताया अपि कृते विषयापेक्षायां सोमादि वाक्यविहितो यागादिरेव साध्यत्वात् तज्जन्यत्वेन सम्बध्यत

इत्यभ्युपगन्तव्यम्। तत्र च कार्यतावच्छेदकस्य यागत्वादेर्भेदात् कारणीभूतायां कृतावपि वैजात्यमावश्यकमेव। न च तत्तत्कार्यतावच्छेदकावच्छिन्नं प्रति यत्नत्वेनैवकारणतास्तु होमोत्पत्तिदशायां यागोत्पत्तिप्रसक्तिस्तु विजातीया दृष्टरूपसामग्रि अभावादेव निराकर्तव्येति वाच्यम्। विजातीयादृष्टस्य कारणत्वकल्पने प्रमाणाभावात्, अन्यथा तन्मात्रादेव कार्यमात्रोत्पत्त्युपपत्तौ कारणमात्रोच्छेदापत्तेः। [२६]अदृष्टगतवैजात्य-कल्पनापेक्षयोपस्थितकृतावेव वैजात्यस्य कल्पयितुं युक्तत्वाच्च। [२७]एवं च कार्यमात्र-वृत्तिजातेः किञ्चित्प्रतिकार्यतावच्छेदकत्वनियमोऽप्यनुगृहीतो भवति।

न चैवमीश्वरकृतौ कार्यद्वयजनकतावच्छेदकजातिद्वयसत्त्वात् [२८]साङ्कर्यम्, ईश्वरकृतेरेवानङ्गीकारात्। तस्मात् तत्तत्कार्यतावच्छेदकावच्छिन्नवाचिधातुभेदायुक्त एव इह कारणभूतभावनाभेदः। इति सिद्धान्तमुल्लिलेख।

यदि कार्यतावच्छेदकभेदे कारणतावच्छेदकवैजात्यकल्पनावश्यकत्वात् एव यागदानभावयोः भेदः तर्हि यत्र फलद्वयोद्देशेन एकं कर्म विधीयते यो ज्योगामयावीस्याद्योवाकामयेत सर्वमायुरियमिति तस्मा एतामिष्टिं निर्वपेत् इत्यादिषु तत्राप्यामयनिवृत्तित्वसर्वायुः प्राप्तित्वरूपकार्यतावच्छेदकभेदेन यादृशो यागदानयोः भेदः तादृश एव कारणीभूतभावनाभेदस्स्यात्।[२९]

तुल्यन्यायत्वादेकस्यैवाग्निहोत्रादिकर्मणः नित्यत्वकाम्यत्वे प्रमाणानुसारा-दाश्रीयते। तत्रापि प्रत्यवायपरिहारत्वस्वर्गत्वरूपकार्यतावच्छेदकभेदादुक्तन्यायेन विजातीयकर्मत्वं स्यात् न चेष्टापत्तिः। काम्याग्निहोत्रस्य मासाग्निहोत्रतुल्यत्वात् तुल्ययोगक्षेमतापातात्। तथाचाग्निहोत्रं नित्यं काम्यञ्च मासाग्निहोत्रात् कर्मान्तरमिति सिद्धान्तव्याकोपः। किञ्च तत्तत्कार्यतावच्छेदकावच्छिन्नं प्रति यत्नत्वेनैव कारणतास्तु। न च यागोत्पत्तिदशायां दानोत्पत्तिः किन्न स्यादिति अतिप्रसङ्गपरिहाराय कृतावेव वैजात्यं कल्प्यमित्युक्तमिति वाच्यम्। हन्तैवं एकयागव्युत्पत्तिदशायां यागव्यक्त्यन्तरोत्पत्तिः किं न स्यादिति अतिप्रसङ्गपरिहाराय यागदानजनकीभूतकृताविव यागजनककृतावपि वैजात्यकल्पनापत्तिः। ततश्च शब्दान्तराभावेऽपि भवदुक्तन्यायेन भावनाभेदसम्भवात

शब्दान्तरे कर्मभेद इति मूकविजल्पितं स्यादिति न किञ्चिदेतत्। तस्मादुक्तरीत्यैव एकप्रकरणगतेषु अपर्यायधातुनिष्पन्नाख्यातेषु सिद्धो भावनाभेदः।

न च एकप्रकरणगतेषु इति विशेषणं व्यर्थम्। प्रकरणान्तरगतानामपि आख्यातानामेतदधिकरणोदाहरणत्वसम्भवादिति वाच्यम्। तथा सति प्रयोजनानाञ्जस्य प्रसङ्गात् अस्याधिकरणस्य पूर्वपक्षे दानादीनामपि प्रधानत्वाद्विकृतिषु अनतिदेशात् अननुष्ठानम्। सिद्धान्तेत्वनुष्ठानमिति हि प्रयोजनमाहुः। तच्च प्रकरणान्तरगतानामपि उदाहरणत्वेन ........................भवति। सर्वेषामपि समत्वेन प्रकृतिविकृतिभावाद्ययोगात् । एतेन यथैकप्रकरणगतेष्वाख्यातेषु लाघवप्रत्ययैक्याभ्यां भावनैक्यम् । एवं दर्शपूर्णमासाग्निहोत्रादिवाक्येष्वप्येका भावनेति ताभ्यामेव लाघवप्रत्ययैक्याभ्यां वक्तुं शक्यत्वेन सर्वत्र एकस्या एव भावनायाः प्रत्यभिज्ञाने सति असन्निधानलक्षणप्रकरणान्तरस्याभावात् न ततोऽत्र भावनाभेदशङ्कावकाशः। एवं च एकप्रकरणगतेष्वाख्यातेषु भावनैक्येव्युत्पादिते तत्तुल्यन्यायतया अन्यत्रापि भावनैक्यं स्वयमेवाज्ञास्यतीत्यभिप्रेत्याकरे मन्दधियां सुखवोधायैकप्रकरणगतानीत्युक्तमिति नवीनस्य कल्पनं निरस्तम्, उक्तप्रयोजनासिद्धेः। न च पूर्वपक्षे सर्वेषां धात्वर्थानां समप्राधान्यं विकल्पश्च। सिद्धान्ते तु सोमयागस्यैव प्राधान्यम् अन्येषां तु तदङ्गत्वान्नविकल्प इति कौस्तुभोक्तम्। प्रयोजनमपि त्वया स्वीकर्तु शक्यम्। त्वया सर्वेषामपि धात्वर्थानाम् उत्पत्तिशिष्टत्वाभ्युपगमात् विकल्पायोगात्।

किञ्चैवं सर्वविदस्य धात्वर्थनिश्चयानुष्ठानस्य श..........त्वादि...........नुष्ठान-कत्वलक्षणमप्रामाण्यं पूर्वपक्षे स्यात्। न च तदेव पूर्वपक्षे प्रयोजनमस्त्विति वाच्यम् अप्रामाण्यस्य प्रथमाध्याय एव निरासात्। इह वेदप्रामाण्यमभ्युपेत्यैव पूर्वपक्षस्य प्रवर्तयितव्यत्वात्। न च विकल्पेनानुष्ठानं सम्भवतीति वाच्यम्। सर्वेषामुत्पत्तिशिष्टत्व-मातिष्ठमानस्य तव विकल्पो न युज्यत इत्युक्तम्। न च यावच्छक्यं नित्यवदनुष्ठीयत इति नाप्रामाण्यमिति वाच्यम्। बहुषु शक्येषु कर्मसु सन्निपतितेषु हानोपादानयोः विनिगमनादिष्विवास्तां तावत् ............नामृष्यति धर्मकर्त्री सा भावना बह्वनुरागवार्ताम्।

न च स्पृशेत्प्राज्ञ इवान्यजुष्टां धात्वर्थ एकां स हि शास्त्रवश्यः। तस्मात् सिद्धो धात्वर्थभेदेन भावनाभेदः।

एकस्यैवं पुनश्रुतिरविशेषादनर्थकं हि स्यात्

सिद्धान्तसूत्रम् -- आन्यपर्येणरहितमसकृच्छ्रवणं विधेः।

अभ्यासमाहुस्तन्त्रज्ञास्ततो भेदोऽत्र कथ्यते॥

अत्र प्रत्ययः पुनःश्रवणमात्रस्य प्रत्यभिज्ञाद्वारा अभेदबोधकत्वेन विरुद्धत्वाद्विधेरित्युक्तम्। अप्रवृत्तप्रवर्तनास्वभावस्य च विधिप्रत्ययस्य भेदसाधकत्वान्नोक्त दोषः। दध्ना जुहोतीत्यादौ सत्यपि विधिपुनःश्रवणे कर्मभेदाभावात् उक्तं अन्यपर्येणरहित मिति, तत्र विधेर्गुणादिसम्बन्धपरत्वात् नातिप्रसङ्गः। यद्यपि शब्दभेदरूपत्वेन शब्दान्तरसादृश्यात् स.........एव तदानन्तर्ययुक्तम्। तथा सत्यप्याख्यातैक्येन भावना प्रत्यभिज्ञाने धातुभेदेन तदर्थभेदाद्युक्तो भावना भेदः। इह तु .............धातोरप्येकत्वेन तद्भेदे मानाभाव इति द्रागेव पूर्वपक्षोत्थानात् अभ्यासस्यैवान्तर्ययुक्तमित्येके। यथा शब्दान्तरेण पदश्रुत्या प्रतीयमानार्थमवलम्ब्य भेदकत्वमेवमभ्यासस्यापीत्यनेन सादृश्येनाभ्यासस्यैव तदानान्तर्यं युक्तम्। न संज्ञादीनाम्। तेषां विधिपदस्य त्वाभावेन ............गम्यसम्बन्धमपेक्ष्य भेदकत्वादित्यन्ये। दर्शपूर्णमासयोः समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति इति पञ्चकृत्वो अभ्यास्तं यजतीति पदं श्रुतम्। तत्र यागभेदे भावनाभेदः अपूर्वाधिकरणोक्तन्यायेन चापूर्वभेदस्सिद्ध्यतीति यागभेद एव प्रत्यभ्यासमस्तीति न वा इति विचार्यते धात्वर्थस्तत्र यागात्मा धात्वभेदान्नभिद्यते तत्र च प्रत्यभिज्ञानां प्र....ण......॥ न च धातुभेदाभावेऽपि तदभ्यासादेव भेदो अस्त्वितिशङ्क्यम्, लोके घटो घटः इति शतकृत्वो अभ्यासेऽपि भेदाप्रतीतेः, प्रत्युत प्रत्यभिज्ञापकतया भेदबाधकत्वेन विरुद्धत्वात्। ननु न वयमभ्यासमात्राद्भेदं साधयामः किन्तु विधिप्रत्याभ्यासात् विधिनाप्रवृत्तप्रवर्तना कर्मैक्ये तस्य विहितस्य विधानायोगात् उपरुध्येतेति स्वात्मलाभाय भेदमेवावश्यं साधयेदिति चेन्न। तनूनपातं यजतीत्यादौ लेडन्तत्वे नियामकाभावेन लडन्तत्वस्यापि सम्भवात् विधिप्रत्ययाभ्यासस्यैवासिद्धेः। न च लडन्तत्वेऽपि नियामकाभावात् असिद्धो विध्यभ्यस्त इत्याशङ्क्यं निश्चेतुमिति वाक्यम् उपक्रमस्थयजिधात्वभ्यासोपज्ञप्रत्यभिज्ञानुगुण्यायानन्तरश्रुतस्य लडन्तत्व-

कल्पनौचित्यात्। ...............धेतेषु पञ्चसु वाक्येषु एकस्मिन् वाक्येयागविधिरितरेषु नेत्यत्र विनिगमकाभावात् सर्वेष्वपि तद्विधानमाश्रयणीयमिति दुर्वारो यागभेदः।

न च प्रथमश्रुतत्वात् सतिद्वाक्य एव यागविधिरिति वाच्यम्। तथा सति तनूनपातं यजति इत्यादिवाक्यस्यानर्थक्यप्रसङ्गः इति। नैष दोषः एकस्यैव यागस्य तनूनपादग्न आज्यस्य वेत्वित्यादिमन्त्रवर्णप्राप्तानेकदेवताशालित्वावलम्बनेन न स्तुत्यर्थतया सार्थक्यम्। न चैवमपि प्रवृत्तिविशेषकरत्वात् (ना) नर्थप्राया पुनःश्रुतिरिति वाच्यम्। अनर्थप्रापकस्य इह प्रत्यभिज्ञाबलेन न्यायप्राप्ततया सोढव्यत्वात् । अन्यथा - समिधो यजत्युषस एव देवतनामवरुन्धे इत्यादिषु बहुशः पुनःश्रवणस्य सिद्धान्ते आनर्थक्यापरिहारात् । एतेन वसन्तमेवर्तूनामवरुन्धे, ग्रीष्ममेवावरुन्धे इत्यादिपृथगर्थवादाम्नानात् तनूनपातं यजतीत्यादिरपि विधिरिति प्रत्युक्तम् अग्रिमपुनःश्रवणेष्वपि उषस एव देवतानामवरुन्धे इत्यादि पृथगर्थवादाम्नानेन तत्रापि विधित्वप्रसङ्गात्। अस्तु वा सर्वेषां प्रवृत्तिविशेषकरत्वेन सार्थक्यसम्पत्तावपि सम्भवतस्त्यागायोगात् प्राथमिकानां तनूनपातं यजतीत्यादीनां विधित्वं तथापि न यागभेदः। विधेः दध्ना जुहोतीत्यादाविव गुणसन्क्रान्तशक्तिकत्वात् धात्वर्थभावना विषयत्वाभावेनातद्भेदकत्वात्। ननु दध्ना जहोतीत्यादौ दध्यादेरिव प्रकृते कस्य गुणस्य विधिः न तावद्द्रव्यस्य यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तात इत्यत एव द्रव्यप्राप्तेः। द्वितीयान्तपदानां यागकरणीभूतद्रव्यसमर्पकत्वानुपपत्तेश्च। अत एव न देवता विधानम्। द्वितीयान्तानां सम्प्रदानभूतदेवतासमर्पकत्वायोगात्। समिधो अग्न आज्यस्य वियन्त्वित्यादि याज्यामन्त्रवर्णैरेव समिदादिदेवतानां प्राप्तेश्चेति चेन्न, द्वितीयान्तानामपि अग्निं यज विष्णुं यजतीत्यादाविति देवतापरत्वाविरोधात्। वसन्तमृतूनां प्रीणामीत्यादिमन्त्रवर्णैरेव वसन्तादिदेवतानामपि प्राप्त्या समिदादिदेवतानां नियमतो अप्राप्तेश्चेति चेन्न द्वितीयान्तैस्तासामिह नियमविधानसम्भवात्। नन्वेवमपि विनिगमनाविरहात् क्व यागविधिः क्व वा तदनुवादेन गुणविधिः..........। [३०]न च प्राथमिकत्वात् समिद्वाक्य एव यागविधिरिति वाच्यम् । हन्तैवं उत्पत्तिशिष्ट समिद्देवतावरोधेन उत्तरवाक्येषु तत्र देवतान्तरविधानानुपपत्तेः गुणादेव कर्मभेदः दुर्वार इति

चेन्न । अत्र पार्थसारथिमिश्राः - नेह गुणाद्भेदस्सर्वेषां तनूनपादादीनां उत्पन्नशिष्टत्वात् दध्यादिवदभेदकत्वात् । समिधो यजतीति चोत्पत्तौ समिच्छब्दस्य नामधेयत्वेन गुणत्वाभावात् । न चागृह्यमाणविशेषत्वं प्रथमोच्चारितत्वेन समिद्वाक्ये यागविधिः इतरत्र तत् प्रत्यभिज्ञानात्तदनुवादेन गुणविधिश्चरमश्रुतत्वात् इति समादधिरे।

अत्र कौस्तुभकारः -

समित्पदस्यापि नामधेयत्वं नोद्भिन्न्यायसिद्धम्, उभयत्र तुल्यवद्वृत्तिकत्वाभावात्। वाक्यभेदतद्व्यपदेशौ तु नाशङ्कनीयावेव तत्प्रख्यन्यायेपि नियमस्याप्राप्तत्वादनुपपन्नः देवतामात्रप्राप्त्यातदुपपादनं तु तनूनपादादिपदसाधारणम् । [31]तनूनपादादिपदेष्वप्यविशिष्टम्। अतो न समित्पादमात्रस्य नामधेयत्वाभिधानं युज्येत।

तस्मादेवं परिहर्तव्यम् - स्वाहाकारवाक्ये कर्मविधिः तत्रत्य स्वाहाकारपदस्य नामधेयत्वात्। न हि तत्र स्वाहाकारपदं स्वाहाकार[32] देवताविधायकम्। तस्य णमुलन्तत्वस्यापि सम्भवेन द्वितीयान्तत्वे नियामकाभावात् देवताविध्यप्रतीतेः। मन्त्रवर्णतः पक्षे स्वाहाकारदेवताया अप्राप्तत्वेनापूर्वायाः स्वाहाकारदेवतायाः विधौ गौरवाच्च। नापि स्वाहाकारशब्दमात्रविधिः। णमुलन्तत्वस्यापि संशयितत्वेन तद्दोषतादवस्थ्यात् स्वाहाकार (शब्द)[33]स्य मन्त्रवर्णान्नित्यप्राप्तत्वेन नियमविधेरप्यनाशङ्कनीयत्वाच्च। अतो असौ तत्प्रख्यन्यायेन नामधेयमिति तत्रैव कर्मविधिः।

इतरे तु तदनुवादेन वैकल्पकदेवताविधयः इत्यवर्णयन्। तन्न, समित्पदस्य तत्प्रख्यन्यायेन नामधेयत्वसम्भवात्। विधित्सितगुणप्राप्तिमात्रेणैव तत्प्रख्यन्यायश्शक्यते वक्तुम्। न तु तत्र नियमप्रवेशोऽपि गौरवात्। अग्नेः प्रातराहुतिप्राप्तावपि[34] सायं होमे प्राप्तिमात्रेणैवाभ्यासरूपत्वेन तदेकतापन्नस्य प्रातर्होमस्याग्निहोत्रपदं तत्प्रख्यन्यायेन नामधेयमित्यभ्युपगतत्वाच्च। यदुक्तं देवताप्राप्तिमात्रेण नामत्वे तनूनपादादीनामपि नामत्वसम्भवात् समित्पदमात्रस्य नामधेयत्वकथनमयुक्तमिति - तत्तुच्छम् प्राथमिकस्य विनिगमकस्य मिश्रैरेवोक्तत्वात्। यत्तु स्वाहाकारवाक्ये कर्मविधिः इति समाधानाम् - तदसत् । तत्रापि स्वाहाकारलक्षणदेवताविधानसम्भवात्। न च णमुलन्तत्वस्यापि सम्भवात् द्वितीयान्तत्वे नियामकाभावात् न देवताविधिरिति साम्प्रतम्।

द्वितीयान्तत्ववत् णमुलन्तत्वासम्भवात्। स्वाहाकारेण प्रयाजेषु यज्ञं संस्थाप्यमपश्यन् तँस्वाहाकारेण प्रयाजेषु समस्थापयन् इत्यादिवाक्यशेषेण उत्तमप्रयाजस्तावकेन द्वितीयान्तत्वनिर्णयात्। तस्य णमुलन्तत्वे हि [35]कृन्मेजन्तः इत्यनेन मान्तकृतो अव्ययत्वानुशासनेन [36]अव्ययादाप्सुपः इति सुपो लुगवश्यम्भावात् स्वाहाकारेणेति तृतीयान्तनिर्देशो नोपपद्यते। न च स्वाहाकारं यजतीत्यतोऽन्य एव तृतीयान्तस्वाहाकारशब्दः इति वाच्यम्। बर्हिरनन्तरवाक्यश्रुतस्वाहाकारशब्दस्यैव बर्हिस्तुत्यनन्तर स्तुतिवाक्ये प्रत्यभिज्ञानेन तच्छब्दैक्यावधारणात्। किञ्च समिदादिद्वितीयान्तपदप्रायपाठादेवस्वाहाकारशब्दस्य द्वितीयान्तत्वं स्वध्यवसानम्। अन्यथा णमुलन्तत्वेक सम्भाव्यमानस्य कर्मनामधेयत्वावधारणमपि न स्यात् । णमुलन्तस्य त्वाप्रत्ययान्तवदपर्यवसिताभिधेयत्वेन कर्मनामतामर्हत्वात्। अत-स्सम्भवत्येव स्वाहाकारवाक्ये देवताविधिः। न च तत्र गौरवम्, तस्य प्रामाणिकत्वात् । तनूनपादाद्यपेक्षया प्रकृष्टसार्थक्यसुपादकत्वेन भूषणत्वाच्च । अस्तु वा णमुलन्तत्वसंशयेन देवताविध्यप्रतीतिः, तथापि न गुणविधित्वहानिः। णमुलन्तत्वमेवाश्रित्य वषट्कारस्थाने स्वाहाकारविधानसम्भवात्। स्वाहाग्निं इत्यादिमन्त्रे स्वाहाकारान्ततया अप्राप्तेः। स्वाहाकृत्य यजतीति विधाने हि वेदं कृत्वा वेदिं कुर्यादितित्यादाविव यागे स्वाहाकाराव्यवहितानन्तर्यप्रतीतेः तत्कारणमन्त्रे स्वाहाकारान्तता सिद्ध्यति । अतो न सर्वथा स्वाहाकारवाक्ये कर्मविधिः किन्तु प्राथमिकत्वात् समिद्वाक्य एवेति अलमधिकेन। उपायन्तु ब्रूमः - न समिद्वाक्ये कर्मविधिः समिच्छब्दस्य बहुवचनान्तस्य एकयागानामतानर्हत्वात् प्राथमिकस्यापि अयोग्यस्य परित्याज्यत्वात्। किन्तु तनूनपातं यजतीत्यत्रैव कर्मविधिः। तनूनपादग्न आज्यस्य वेत्विति मन्त्रवर्णोपात्ततनूनपादप-देवताप्राप्त्या तत्प्रख्यन्यायेन तनूनपात्पदस्य यागनामत्वसम्भवात्। एकवचनान्तत्वेन योग्यत्वात्। न च बर्हिरादेरपि एकवचनान्तत्वात् योग्यतास्तीति विनिगमना-विरहश्शङ्क्यः, तदपेक्षया प्राथमिकत्वस्यैवात्र विनिगमकत्वात् युक्तः यागविधिः। ततश्च प्राथमिकमपिसमिद्वाक्यमयोग्यम्। योग्यमपि बर्हिरादिचरमश्रुतमित्युभयमपि विहाय

योग्येषु प्राथमिके तनूनपातं यजतीत्यस्मिन्नेव युक्तो यागविधिः इतरत्र गुणविधिरिति सूरयस्सूक्ष्ममीक्षान्तामिति दिक्।

भवदेवस्तु -

उपांशुयाजस्य उत्पत्तिशिष्टदेवताकत्वाभावात् समिदादिवाक्येषु पञ्चस्वपि तत्र देवताविधिः। तत्र क्रमाद्यवगतविष्ण्वादिदवत्ययाज्यानुवाक्यायुगलानान्तु क्रमं बाधित्वा लिङ्गेनोत्कर्ष इति अभाणीत्। सर्वेष्वपि पक्षेषु [३७]चतुर्दशपौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायाम् इत्यस्ति वाक्यशेषः । पञ्चप्रयाजा इज्यन्ते, द्वावाज्यभागौ स्विष्टकृत्, त्रयो अनुयाजाश्चेत्येकादशाहुतयः आग्नेयोपांशुयाजाग्नीषोमीयास्तिस्रः इति चतुर्दश पौर्णमास्याम्। अमावास्यायां तु एकादशाहुतयः आग्नेयसान्नाय्याहुती द्वेदधिपयसोरेकदेवताकत्वेन तदाहोरेकत्वात् इति त्रयोदशेति तदर्थः इत्यादि संख्यादर्शनं वैकल्पिकदेवताभेदमादायसमर्थनीयम्। यद्यपि समिदादीनां पञ्चानामपि कर्मनामत्वं [३८]सिद्धान्तरीत्या प्राथमिकत्वेन समिद्वाक्य एव कर्मविधिः इतरत्र गुणविधिः । [३९]इतरे तु तेन पुनर्यजेतेतिवत् तस्यैव कर्मनो अभ्यासविधायकाः, न कर्मान्तरविधायकाः प्रकृतप्रत्यभिज्ञाबाधप्रसङ्गात्। अस्मिंश्च पक्षे ..................संख्या-दर्शनानाञ्जस्यशङ्कापि तेन पुनर्यजेत इत्यत्र दक्षिणां विना समापितस्यैव प्रथमप्रयोगस्य तेन पुनः यजेतेत्यनेनाभ्यासविधिः तद्वदित्यर्थः। न चैवं संज्ञातो भेदश्शङ्क्यः तस्याभ्यासाभिप्रायेणैवोपपत्तेः। तत्सिद्धम् सर्वथा यागैकत्वमपि[४०]॥

अत्रोच्यते -

समिदादो विधिरसावप्रवृत्तप्रवर्तकः।
आवृत्तः पञ्चकृत्वोऽत्र पञ्च यागानुदञ्जयेत्॥

यद्यत्र एक एव यागस्स्यात् तदा तस्यै तेनैव विधिना विहितत्वात् विहितस्य च पुनर्विधानायोगात्, विधिप्रत्ययचतुष्टयस्य अप्रवृत्तप्रवर्तनशीलस्य उपरोधस्स्यात्। न च लेट् वेदे इत्यस्य नियामकाभावात् विधिप्रत्ययत्वमेवासिद्धमित्युक्तमिति वाच्यम् । पञ्चस्वेकस्य लेट् त्वमुभयसम्मतम् अवशिष्टचतुष्टयस्याप्यनुवादमात्रत्वे आनर्थक्यापत्तेः

लेटत्वमवश्याश्रयणीयम्। विध्यन्तरैकवाक्यायाः स्वरसतः प्रतीत्यभावात् पृथगर्थवादाम्नानाच्च। यत्तु स्तुत्यर्थतया सार्थक्यमिति कथितं तन्न।

प्रवृत्तिविशेषकरत्वाभावेन, स्तुतेश्च वसन्तमृतूनां प्रीणामीत्यादिवाक्यैरेव सिद्धत्वात् आनर्थक्यस्य वज्रलेपत्वात्। न चैवं विष्णुरुपांशु यष्टव्यः इत्यादावार्थक्यभिया विधित्वये वाश्रयणीयं स्यादिति वाच्यम्। तत्रोपक्रमोपसंहारावगतैकवाक्यताभङ्ग-रूपबाधकवशात् विधित्वपरित्यागेप्यत्र तथाविधबाधकाभावेन स्वारसिक-विधिपरित्यागानौचित्यात्। न चेहापि यागैक्ये पुनः प्रत्यभिज्ञारूपबाधकवशाद्विधित्वं परित्यज्यतामिति वाच्यम्। इह तच्छब्दाद्यभावेन स एवायं यागः इति प्रत्यभिज्ञायाः यजतिमात्रेणासिद्धेः । न च यजति मात्रेण यागोऽयमिति कथ्यते। स एवेत्यंशस्तु सन्निधिनेति दुरपह्नवाप्रत्यभिज्ञेति वाच्यम्। हन्तैवं सन्निधिकृता प्रत्यभिज्ञा, विधिश्रुत्या भेदज्ञानमिति प्रबलश्रुत्यनुरोधेन दुर्बलसन्निधिकृतप्रत्यभिज्ञां बाधित्वा यागभेदस्यैवास्येयत्वात्। एतेन उपक्रमस्य यजिधात्वभ्यासोपज्ञप्रत्यभिज्ञानुगुण्या-दनन्तरश्रुतस्य प्रत्ययस्य विधित्वं त्यज्यत इत्युक्तम् प्रत्युक्तम्। यजितः प्रत्यभिज्ञासिद्धेः। सन्निधेश्च दुर्बलत्वात्। तदेवं सतिद्वाक्यविहितस्य यागस्य स्तुत्यर्थतया तनूनपातं यजतीत्यनुवादः इति पक्षः प्रतिक्षिप्तः।

तत्र गुणविधानार्थं अनुवादो न यागान्तरविधिः इति कल्पोऽपि नावकल्पते समानपदश्रुत्या समानाभिधानश्रुत्या च विधेर्धात्वर्थभावनयोरेव व्यापारौचित्येन उपपदार्थे व्यापारासम्भवात्। ततश्च गुणविधानार्थमपि अनुवादत्वं सन्निधिकृतप्रत्यभिज्ञायत्तं श्रतुविरोधादेव त्यक्तव्यम्। नन्वेवं दध्ना जुहोतीत्यादौ सन्निधिकृतप्रत्यभिज्ञाबलेन धात्वर्थभावनयोर्विधिं बाधित्वा उपपदार्थस्य दध्यादेः विधेयत्वमभ्युपगम्यते।तन्न स्यात्। तवापि उक्तन्यायेन धात्वर्थभावनयोरेव विधिव्यापारावश्यम्भावात् इति चेन्न, केवलं हि प्रत्यभिज्ञानं नानुवादत्वप्रयोजकम्। किन्तु यागविधेरन्यतोधात्वर्थप्राप्त्यपेक्षासहितं, तेन विध्यपेक्षा प्रत्यभिज्ञायोरेकतराभावेऽपि नानुवादः। दध्ना जुहोतीत्यादौ हि दध्यादिपदानामर्थान्तरेत्यन्तरूढानां तत्प्रख्यन्यायेन .......... रहितानां कर्म नाम तस्या नाशङ्कनीयत्वात्, दधिविशिष्टकर्मान्तरविधौ गौरवात्, तत्परिहाराय विधिः अन्यतो

धात्वर्थभावनयोः प्राप्तिमपेक्षते। अनुमन्यते च स्वापेक्षितकर्मानुवाद............... त्व साधनं सन्निधिकृतमपि प्रत्यभिज्ञानमिति, दध्यादिषु अपेक्षा प्रत्यभिज्ञयोरुभयोरपि सत्वाद्व्यक्तः तत्र कर्मानुवाद इति। सोमेन यजेतेत्यादौ तु यद्यपि विशिष्टविधिगौरवपरिहाराय विधेरन्यतो धात्वर्थभावनयोः प्राप्त्यपेक्षाऽस्ति तथापि प्रकृतप्रत्यभिज्ञाभावान्न तत्र कर्मानुवादः। प्रकृते तु सत्यपि प्रत्यभिज्ञाने विध्यपेक्षाविरहान्नानुवादः दध्ना जुहोतीत्यादौ दध्यादेरिवात्र धात्वर्थभावनातिरिक्तस्य विधेयस्याभावान्नविधेस्तदनुवादापेक्षा च। तद्रूपादि देवतानियमस्य मन्त्रवर्णतो अप्राप्तेर्न विधेयत्वमित्युक्तम् इति वाच्यम्। अन्यतराकांक्षाबललभ्यसम्बन्धानुमन्त्रण-तन्त्रकल्प्यवसन्तादिदेवतापेक्षया उभयाकांक्षाबललभ्यसम्बन्धयाज्यामन्त्रकल्प्य-समिदादिदेवतानां बलवत्वेनविषमशिष्टविकल्पनानुपपत्त्या[४१] याज्यामन्त्रवर्णैरेव समिदादिदेवतानियमस्यापि प्राप्तेः। विधेयदुर्भिक्षम् प्रतीकार्यम्।

न चैवं वसन्तमृतूनामित्याद्यनुमन्त्राणां प्रयाजदेवताप्रकाशकत्वाभावात् पूषानुमन्त्रणमन्त्रवदुत्कर्षापत्तिः - तद्वत्तेषां प्रयाजानुमन्त्रणमन्त्रसमाख्यावतां प्रयाजातिरिक्तसामान्यसम्बन्धबोधकप्रमाणाभावात् उत्कर्षानुपपत्तेः अदृष्टार्थत्वस्यैव स्वीकारात्। मनोतास्थ्याग्निशब्दवत् इह वसन्तादिदेवतालक्षणया समिदादि-देवताप्रकाशका एव ते। न चैवमदृष्टार्थत्वाभावे एको ममैका तस्येत्याद्यनुमन्त्रणमन्त्रान्तराणां विकल्पानुपपत्तिः तेषामपि लक्षणया प्रयाजकाल प्रकाशकत्वेन भिन्नकार्यतया समुच्चयोपपत्तेरित्यपि कश्चित्। तस्मात् समित्तनूनपादादिपदानां गुणविधित्वासम्भवात् - तत्प्रख्यन्यायेन नामधेयत्वावश्यम्भावात् विधि पुनःश्रवणरूपादभ्यासात् सिद्धो यागभेदः। तत्प्रख्यन्यायेन नामत्वे सिद्धे समिधः इत्यादिबहुवचनस्यागत्या देवताकारकाधिष्ठानगतबहुत्वानुवादकत्वादिना कथञ्चित् समाधानसम्भवात् नकाप्यनुपपत्तिः। मास्तु वा कर्मनामता तथापि समिदादिपदानां मन्त्रवर्णप्राप्तदेवतानुवादकत्वोपपत्तेः। सर्वथा विधेः धात्वर्थभावनाविषयत्वाविधानान्न सिद्धान्तहानिः।

नन्वेवमप्युपांशुयाजानुवादेन समिदादिदेवताविधानमिति पक्षे न किञ्चित् बाधकम्। विष्णुदैवत्यमन्त्राणां क्रमं बाधित्वा लिङ्गेनोत्कर्षः इत्युक्ततया तत्र मन्त्रवर्णतोऽपि देवताप्राप्त्यभावादिति चेन्न। उपांशुयाजकवैकल्पिकसमिदादि-देवताकत्वेअतिहायेडो बर्हिः प्रतिसमानयत इत्यादिसमुच्चयज्ञापकानुपपत्तिः। विष्ण्वादिदेवताकत्वाभावे च विष्णुरूपांशुयष्टव्यो अधमित्वायेत्याद्यर्थवादानुपपत्तिः इत्ययमपि पक्षो न साधुः।

इदन्त्ववशिष्यते -

सतिद्वाक्यविहितस्यैव कर्मणो अग्रिमवाक्ये..................आवृत्तिविधिर्न कर्मान्तरविधिः । एवञ्च सति न विधिश्रुत्युपरोधः न वा समुच्चयज्ञापकादनुपपत्तिरिति। अत्राहुः - एवं सति पुनः प्रयोगापरपर्याये अभ्यासे यजेर्लक्षणाप्रसङ्गः तेन[४२] पुनर्यजेतेत्यत्र तु पुनश्शब्देनैव पौनःपुण्यस्य समर्पितत्वात् न लक्षणा।

न चैवं एकादशप्रयाजान् यजतीत्यादावपि आवृत्तिविधिर्नस्यादिति वाच्यम्। तत्र हि प्रयाजानुवादेन विधीयमानासंख्यानिर्ज्ञातपञ्चत्वसंख्येषु तेषु साक्षात्सम्बन्धमलभमाना प्रयाजप्रयोगपरिच्छेदकत्वेन विधीयत इत्युक्तम्, यदर्थदभ्यासमापादयतीति। इह तु तद्विधेयं इति लक्षणा स्यादेवेति वैषम्यम्। नचैवं सिद्धान्तेऽपि लक्षणा तुल्यायागत्वसामान्यवाचिनो यजेः विधेयतावच्छेदके विधीयमानत्वे शक्त्यभावात् इति वाच्यम्। विधीयतयागत्वलक्षणास्वीकारेऽपि तदवच्छेद-यागव्यक्तेश्शक्यतावच्छेदकीभूतयागत्वेनाप्यवच्छेदेन ईदृशलक्षणायाः अदोषत्वादिति कौस्तुभकृतः।

विधेरभ्यासतस्तस्मादान्यपर्यविवर्धितात्। समिधो यजतीत्यादौ साधिता कर्मणां भिदा।।

स्यादेतत्समिदादिसंज्ञाभेदात् - अथैष ज्योतिरित्यादाविवात्र भेदसिद्धिः। नाभ्यासस्य भेदकत्वम्। अन्यथा संज्ञाधीनभेदस्थलेऽपि अभ्यासादेव भेदस्स्यात्। अतो दुर्वारमन्यतरवैयर्थ्यमिति दिक् - मैवम् - यागभेदसिद्धौ संज्ञान्तरावरोधदोषाभावात्

तनूनपादादीनां संज्ञात्वसिद्धिः। तत्सिद्धौ च संज्ञाभेदाद्यागभेदसिद्धिरिति परस्पराश्रयप्रसङ्गः। ततश्चाभ्यासनिमित्तभेदाधीनं तेषां संज्ञात्वमिति। नेह संज्ञातो भेदसिद्धिः। न चैवं अथैष ज्योतिरित्यादिष्वपि ततो भेदो न स्यादिति वाच्यम् , तत्र यागादेरेवाधिकारार्थकाथशब्देन प्रकरणविच्छेदात्, ज्योतिरादिपदानां विधास्यमानानिर्धारितक्रियाविशेषसंज्ञात्वावधारणेन तत्संज्ञासिद्धेः। अभ्यासनिमित्तयागभेदावगमाधीनत्वाभावेन संज्ञावशादेव भेदसम्भवात्। उद्भिदा यजेतेत्यादावपि धातुपारार्थ्यविप्रकृष्टविधानादिदोषप्रसङ्गेन गुणविध्ययोगादेव संज्ञात्वनिर्धारणं यागभेदनिश्चयात्प्रागेव सम्भवतीति तत्रापि संज्ञात एव भेदः न त्वभ्यासात् संज्ञात्वाभावे गुणविधिपरत्वप्रसङ्गेन विध्यभ्यासस्यान्यपरतया भेदकत्वायोगात्। अथ प्रकृतेऽपि संज्ञात्वाभावे, देवताविधिपरत्वेनान्यपर्याद्धि...........भ्यासस्य संज्ञामुख निरीक्षकत्वात् न स्वातन्त्र्येण भेदकेति चेन्न, संज्ञात्वस्य प्रागसिद्धेः। संज्ञात्वाभावेऽपि देवतानां मन्त्रवर्णतः प्राप्त्यैव देवताविधिपरत्वान्निरस्य आन्यपर्यपरिहाराय संज्ञामुखनिरीक्षणात्। नचैवं तत्प्रख्यन्यायेन प्रागेव संज्ञात्वं सेत्स्यतीति वाच्यम्। तत्प्रख्यन्यायस्य गुणविधिमात्रातिबन्धकत्वात् । यजिसमभिव्याहृतानां तु तनूनपादादिपदानां मन्त्रवर्णप्राप्तदेवतानुवादकत्वेनाप्युपपत्तेः यागभेदावगतेः प्राक् संज्ञात्वासिद्धेः न चैवं ततःपश्चादपि तदसिद्धिप्रसङ्गः। अभ्यासेन यागभेदावगतौ यागान्तराणामवच्छेदकाकांक्षायां तनूनपादादीनां संज्ञात्वावश्यम्भावात्। तस्मादभ्यासमात्रादिह सिद्धो यागभेद इत्याहुः।

वयन्त्विह रचयामः -

अत्र हि पूर्वपक्षो न क्षोदक्षमः। देवताविधिपक्षे समित्पदस्य स्वाहाकारपदस्य तनूनपात्पदस्य च संज्ञात्वमेषितव्यम्। तदेतद्वै प्रयाजानां मिथुन मिति समिदादिषु प्रयाजत्वोक्त्या प्रयाजपदमपि तत्संज्ञा इत्येकस्मिन् यज्ञे संज्ञाद्वयस्यान्याय्यत्वात् प्रयाजपदं सामान्यसंज्ञा समित्पदं तु विशेषसंज्ञा इति वक्तव्यम्। एतच्च यागैक्येन सम्भवतीति दुर्वारो यागभेदः। अत एव सिद्धान्तोऽप्सम्बद्धः। उक्तरीत्या प्रयाजसमित्पदरूपसंज्ञाया एव भेदसिद्धेरभ्यासस्याकिञ्चित्करत्वात् ।

नन्वेवमप्युपांशुयागानुवादेन पञ्चस्वपि वाक्येषु देवताविधिरिति। भवदेवपक्षे समित्पदस्य संज्ञात्वाभावान्न संज्ञातो भेदः समिद्वाक्यविहितकर्मणोऽभ्यासविधिरिति पक्षेऽपि यागव्यक्तिबाहुल्यात् सामान्यविशेषसंज्ञारूपेण प्रयाजमित्संज्ञयोरविरोध इति न पूर्वोत्तरपक्षानुपपत्तिरिति चेत् - भ्रान्तोऽसि। भवदेवपक्षे सतीत्संज्ञानभ्युपगमेऽपि प्रयाजोपांशुयाजसंज्ञयोरवर्णनीयतया तदंशेन यागभेदावश्यम्भावात्। अभ्यास-विधिपक्षेऽपि यागव्यक्तिबाहुल्यात् सामान्यविशेषसंज्ञारूपेण प्रयाजसमित्संज्ञयोरविरोध इति न पूर्वोत्तरपक्षानुपपत्तिरिति चेत् , भ्रान्तोऽसि। भवदेवपक्षे समित्संज्ञानभ्युपगमे अपि प्रयाजोपांशुयाजसंज्ञयोरवर्जनीयतया यागभेदावश्यम्भावात् । अभ्यासविधिपक्षेऽपि समित्संज्ञकस्यैव कर्मणोऽभ्यासविधानेन सायंप्रातर्होमयोरग्निहोत्र कर्माभ्यासरूपयोः अग्निहोत्रसंज्ञाया इव समित्संज्ञायाः तनूनपादादिकाभ्यासानामपि नामत्वं वाच्यम्। इति प्रयाजपदस्येव समित्पदस्यापि सामान्यसंज्ञात्वापत्तिः सामान्यसंज्ञाद्वयञ्चान्याय्यमिति। समित्पदं विशेषसंज्ञेत्येव हि कार्यम् - तस्य विशेषसंज्ञात्वं चाभ्यासविधावुक्तरीत्या न सम्भवतीति तत्सिद्धेः कर्मान्तरविधेरेव आश्रयणीयतया इति पूर्वोत्तरपक्षानुपपत्तिः वज्रलेपायिता।

तस्मादयमिहपन्था-

यस्यैवं विदुषः प्रयाजा इज्यन्ते इत्यत्रप्रयाजाख्यकर्मविधिः। समिधो यजतीत्यादयः पञ्चापि तस्य स्तुत्यर्थः वैकल्पिकदेवता विधिपरा वा तस्यैवाभ्यास-विधायका वा न तु कर्मान्तरविधयः प्रायाजा इति बहुवचनं चाभ्यासाभिप्रायमिति पूर्वः पक्षः। अत्राद्यपक्षे सतिदादयः पञ्चापि न संज्ञाः। अन्त्ये पञ्चापि विशेषसंज्ञा इति न प्राचीनपक्षेष्विव संज्ञावशाद्यागभेदप्रसक्तिः।

राद्धान्तस्तु-

यस्यैवं विदुषः इत्यत्र यच्छन्दोपबन्धने न तत्र कर्मविधिः किन्तु समिदादिवाक्येष्वेव। तेषां वाक्यानामानर्थक्यापत्त्या स्तुत्यर्थत्वासंभवेन देवताविधित्वमभ्यासविधित्वं वा वक्तव्यम्। ततश्चावश्यकत्वात् तत्रैव कर्मविधिः न तु यच्छब्दोपबन्धे वाक्ये विधिकल्पना युक्ता समिदादिवाक्येषु तु विकल्पः उभयसम्मतः। स

च विधिश्रुतधात्वर्थभावनाविषयक एव नोपदार्थविषयकः। अतो न देवताविधानसम्भवः। अभ्यासविधिपरत्वं च प्रागुक्तलक्षणादोषेण निराकार्यम्। पञ्चस्वपि यागविधिपरत्वेऽपि सिद्धे एकताभ्युपगतौ तस्य विहितस्य विधानायोगात् अप्रवृत्तप्रवर्तनात्मकविध्युपपत्तये प्रत्यभ्यासं यागभेदः स्वीकार्य इति सिद्धम्। अनन्यपरविधिपुनःश्रवणरूपस्याभ्यासस्य धात्वर्थभेदकत्वम्। अस्मिन्श्च पक्षे नाभ्यासस्याकिञ्चत्करत्वम्। समिदादीनां पञ्चानामपि संज्ञात्वस्यकर्मभेदावगमात् पश्चादेव सिद्धेरिति न काप्यनुपपत्तिः।

धातूनामप्यभिन्नानां तनयानामिव स्वयम्।
बहुश्रुतः पितेवासौ अर्थान्विभजते विधिः॥

प्रयोजनं तु अभ्यासव्यतिरिक्तपक्षे सकृदेव कर्मानुष्ठानम्। अभ्यासविधिपक्षेषु यत्र विकृतिविशेषे समिधमाश्रित्य फलाय गुणो विधीयते, नाऽत्र तस्य गुणस्य सायंप्रातरग्निहोत्राप्रवृत्तौ दध्न इवासकृदावृत्तिः। पञ्चानामन्यतमलोपे अभ्यासलोपप्रायश्चित्तं वा - सिद्धान्ते अदृष्टार्थत्वात् - पञ्चानामपि समुच्चयेनानुष्ठाने एकाश्रितगुणस्य नावृत्तिः, न वा अभ्यासलोपप्रायश्चित्तमिति दिक्। [४३]प्रकरणं तु पौर्णमास्यां रूपावचनात्, इदानीमभ्यासस्यापवादिकीसङ्गतिरिति। तत्र यदाग्नेयो अष्टाकपालोऽमावास्यायां च पौर्णमास्याश्चाच्युतो भवति, तावब्रूता-मग्नीषोमावाज्यस्यैवोपांशुपौर्णमास्यां यजन्, ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रयच्छत्, ऐन्द्रं दध्यमावास्यायां, ऐन्द्रं पयोऽमावास्यायाम् इति कालसंयुक्तानां यागानां सन्निधौ य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजते इति वाक्यद्वयं श्रूयते। तत्र किमेतद्वाक्यं पौर्णमास्यामावास्यासंज्ञकापूर्वद्वयविधायकम् उत श्रुतकालसम्बन्धानां प्रकृतानामेवाग्नेयादीनां षण्णां यागानां क्रमानुवादकमिति मीमांसा।

तत्र पूर्ववदभ्यासात्कर्मान्तरविधायिता।
प्रकृतेज्यानुवादत्वे ह्यानर्थक्यं प्रसज्यते॥
लट्संशयो यदाग्नेयादिवन्नेति पृथक्स्तुतेः।
विध्यन्तरैकवाक्यत्वाभावाल्लेट्त्वं हि कल्प्यते॥

वाक्यसार्थसार्थक्यलाभाय ज्ञायमानो विधिः पुनः।
यच्छब्दान्नविभेत्येव यदाग्नेयादिवाक्यवत्॥

न चेह विधेरन्यपरत्वं शक्यम् दध्यादिवाक्येष्विव गुणादेरश्रवणात् तत्परत्वासम्भवात्।

नन्वेवमपि श्रुतपौर्णमासीकालानामाग्नेयोपांशुयाजो अग्नीषोमीयाणां त्रयाणां यागानां एकेन पौर्णमासीपदेन, श्रुतामावास्याकालानामाग्नेयदधिपयो यागानामेकेनामावास्यापदेनोपादाने साहित्यप्रतीतेः। एकज्ञानविषयत्वरूपसमुदाय-सिद्ध्या-विद्वद्वाक्ययोस्समुदायसिद्धिपरत्वेनान्पर्यम्। नेहाभ्यासन्यायप्रसरः। न च समुदायद्वयसिद्धरेव निष्प्रयोजनेति वाच्यम्। समुदायाद्वयासिद्धौ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फलवाक्यस्थं दर्शपूर्णमासाभ्यामिति द्विवचनान्तनामपदमप्रसिद्धार्थकं स्यात्। कालयोगिनामाग्नेयादीनां द्वित्वयोगाभावात् द्वित्वयोगिनामप्याज्यभागादीनां कालयोगाभावात् प्रकृतिप्रत्ययोभययोग्यानाञ्चन्येषामिहाभावात् समुदायसिद्धौ त्वाग्नेयादीनां तद्वारा द्वित्वयोगसिद्धेः। तेषु द्विवचनान्तनामपदस्य प्रसिद्धिर्लभ्यत इति तत्प्रसिद्धिरेव समुदायसिद्धेः प्रयोजनम्। न च नामपदप्रसिद्धिरेव न प्रयोजनमिति वाच्यम्। नामपदस्याप्रसिद्ध्यार्थकत्वे प्रकृतसकलयागवाचिनः यजेतेत्याख्यातपदस्य विशेषस्थापने राजसूयपदवदसमर्थतया यजिपरतन्त्रत्वात् - प्रकृतानां प्रयाजाग्नेयादीनां सर्वेषामेवाविशेषेणफलसम्बन्धापत्तिः। प्रसिद्धार्थकत्वे तु चतुर्थोपान्त्याधिकरणन्यायेन ज्योतिष्टोमपदवत् दर्शपूर्णमासपदस्यापि आख्यातनियमनसमर्थत्वात् तद्बलादाग्नेयादीनां षण्णामेव फलसम्बन्धसिद्धिरिति नामपदप्रसिद्धिरर्थवती। न च विद्वद्वाक्यप्रसङ्गात् पौर्णमास्यमावास्याशब्दयोः प्रसिद्धार्थकत्वसिद्धावपि न फलवाक्यस्थयो-दर्शपूर्णमासशबदयोस्तत्सिद्धिः। दर्शपूर्णमासशब्दयोः पौर्णमास्यमावास्यापदाभ्यां समुदायकरणेऽपि न साधारण्येन फलसम्बन्ध इति वाच्यम्। विद्वद्वाक्योपात्तयोः पौर्णमास्यमावास्यासंज्ञयोरेव समुदाययोः, एवं समुदाययोः अग्रे य एवं विद्वान् दर्शपूर्णमासौ यजते, पामामेव काष्ठां गच्छति इति दर्शपूर्णमासशब्दाभ्यां स्तवने तयोस्तात्पर्यावधारणात्। तस्मादाग्नेयादिषड्यागमैक्यफलसम्बन्धसिद्धिफलवाक्यस्य-

दर्शपूर्णमासशब्दगतद्विवचनप्रसिद्धिफलकसमुदायद्वयफलकत्वाद्विद्वद्वाक्ययोरानर्थक्या-भावेनान्यपर्यायान्नाभ्यासादपूर्वकर्मविधायितेति चेत्।

मैवम् - समुदायसिद्धावपि फलवाक्यस्थदर्शपूर्णमासपदस्य तत्परत्वासम्भवात् तस्य यजिसमानाधिकरणत्वेन यागवाचित्वात् समुदायस्य च यागत्वाभावात् । अतः समुदायकरणस्यानर्थत्वान्नर्थत्वान्नतदाश्रयणेन विद्वद्वाक्ययोस्सार्थक्यं शक्यमुपपादयितुं इत्यनुवादत्वे आनर्थक्यध्रौव्यात् अनयोर्विधानमेव युक्तम्। पौर्णमास्यमावास्याशब्दौ च पौर्णमास्यां पौर्णमास्यां यजेत, अमावास्यायां अमावास्यायां यजेत इति वाक्यद्वय-प्राप्तपौर्णमास्यमावास्याकालयोगेन तत्प्रख्यन्यायेन यागनाम्नी। तयोर्वाक्ययोरुत्पत्ति-वाक्यविहितकालेष्वाग्नेयादिषु कालविधायकत्वायोगेन विद्वद्वाक्यविहितकर्मणोरेव कालविधयितावश्यंभावात्। न चैवं पौर्णमास्यमावास्याशब्दयोः ...........संज्ञात्वे सिद्धे ताभ्यां विद्वद्वाक्यविहितयागावनूद्य पौर्णमास्यमावास्यावाक्ययोः कालविधिः सिद्धे च तत्र कालविधौ तत्प्रख्यन्यायेन तयोस्संज्ञात्वमित्यन्योन्याश्रयः।

यत्तु [४४]य इष्ट्या पशुना सोमेन वा यजेत सोमावास्यायां पौर्णमास्यायां वा यजेत इति वाक्यप्राप्तकालयोगमादायैव तयोः कर्मणोरेव संज्ञात्वसिद्धैर्नान्योन्याश्रयः। न चैवं तत एव कालसम्बन्धसिद्धेः इदं वचनद्वयमनर्थमिति वाच्यम्। व्यवस्थार्थतोपपत्तेरिति समाधानम्। तन्न- य इष्ट्यादिवाक्यतः विद्वद्वाक्यविहितकर्मद्वयेऽपि कालद्वयस्य व्यवस्थया अप्राप्तेः तदुपज्ञयोस्संज्ञयोरव्यवस्थितत्वेन ताभ्यामनूद्यमानयागयोः कालयोः व्यवस्थानुपपत्तेः, उक्तवचनद्वयस्य व्यवस्थार्थत्वासम्भवेन वैयर्थ्यस्य दुष्परिहारत्वात्। अतः पौर्णमास्यादिवाक्याभ्यामेव कालप्राप्तेस्स्वीकर्तव्यत्वात् अन्योन्याश्रयादविमुक्तिरिति चेत् सत्यम् । एवम् अग्निहोत्रन्यायेन प्राक् प्रवृत्तिनिमित्तानिश्चये सामानाधिकरण्यमात्रेण कर्मनामत्वे अवधारिते पश्चात्तदनुवादविहितकालयोगेन प्रवृत्तिनिमित्तनिश्चयोपपत्तेः परस्पराश्रयानवकाशः। न च द्वितीयान्तयोः पौर्णमास्यामावास्यापदयोः कथं यजिसामानाधिकरण्यमिति वाच्यम्। सामानाधिकरण्यार्थं ............अग्निहोत्रं जुहोतीत्यादिवदेव द्वितीयायाः करणत्वलक्षकताभ्युपगमादित्याहुः।

वस्तुतस्तु प्रजापतिर्यज्ञानसृजतेत्युपक्रम्याग्निहोत्रादिभिस्सह मावास्ययोः यज्ञत्वेनानुक्रमणम् प्रवृत्तिनिमित्तनिश्चयात्प्राक् एव पौर्णमास्यमावास्यापदयोः यागसंज्ञात्वावगमात् नान्योन्याश्रयः। तस्मात् पौर्णमास्यादिवाक्ये.........कालविधानासम्भवात् - तयोस्सार्थक्यलाभायामपि विद्वद्वाक्ययोः कर्मान्तरविधायित्वमेव न्याय्यम्। नन्वेवमपि द्रव्यदेवतालक्षणरूपाभावात् कथं तत्र कर्मान्तरविधिरिति चेदुच्यते। द्रव्यं तावत् - सर्वस्मै वा एतद्यज्ञाय गृह्णते यद्ध्रुवायामाज्यम् इति वचनेन सर्वयज्ञार्थत्वेन ध्रौवाज्यविधिना ध्रौवाज्यरूपं लभ्यते। अथेदं वचनं वै शब्दोपबन्धान्न विधायकम् न चाप्राप्तार्थकत्वबलात् आग्नेयादिवाक्येष्विव न विधिप्रतिबन्ध इति वाच्यम्। चतुर्ध्रुवायां गृह्णाति इति प्रयोजनविशेषासंयुक्ततयोत्पन्नस्य ध्रौवाज्यस्य प्रयोजनाकांक्षिणा द्रव्यसाकांक्षेषु उपांशुयाजादिषु प्रकरणेनैव प्राप्तेः अप्राप्तार्थकत्वाभावात् । अस्तु वा विधिः तथापि लाघवादाज्यानुवादेन ध्रौवादाज्यानुवादेन ध्रौवतामात्रमन्त्रं विधीयते। ततश्च.........यत्र सामान्यतः आज्यप्राप्तिः तत्रैव ध्रौवतालाभः इति सामान्यतो अप्राप्ताज्यकयोः विद्वद्वाक्यविहितकर्मणो र्नतल्लाभ इति चेन्न। त्वदुक्तरीत्यैव ध्रौवस्योपांशुयागानुवादेन प्रकरणेनैव प्राप्तेर्दुर्वारत्वात्। अस्तु वैत्यप्यसत्। किमाज्यमात्रानुवादेन ध्रौवताविधिरभिमतः अथ पुनर्यज्ञाङ्गभूताज्यानुवादेन आद्ये सदनकरणादिष्वपि तदापत्तिः। न चेष्टापत्तिः यज्ञपदवैयर्थ्यप्रसङ्गात्। नान्त्यः - विशिष्टोद्देशे वाक्यभेदापातात्। तस्मादिह यज्ञोद्देशेन ध्रौवविधिरेवायज्ञात्मक सदनकरणादिषु तद्व्यावृत्तिफलकस्स्वीकार्यः अतः प्रकरणे न वचनेन वा ध्रौवलाभसम्भवात् न तयोः द्रव्यदुर्भिक्षम्।

देवतापि च वार्त्रघ्नी पूर्णमासे नूच्यते वृधन्वती अमावास्यायामिति वाक्याभ्यां पौर्णमास्यासंज्ञयोरनयोर्मन्त्रक्रमाभ्यां आज्यभागाङ्गत्वेनाव्यवस्थया प्राप्तानां वार्त्रघ्नी वृधन्वतीनां व्यवस्थार्थमिति तृतीये[४५] वक्ष्यमाणत्वात् अबाधेनैवोपपत्तौ प्रबलेन उक्तवाक्येन क्रमबाधायोगात् अस्य वचनस्य विद्वद्वाक्यविहितकर्मणोः अत्यन्ताप्राप्तमन्त्रविधिपरत्वे गौरवान्मन्त्राणामाज्यभागाङ्गत्वमेव न्याय्यम् इति न तत्र मान्त्रवर्णिकदेवतालाभ इति चेन्न। तत्रह्याग्नेयादिस्वक्रमाम्नातमन्त्रान्तरावरुद्धतया तत्र

वाक्येन मन्त्रविधानायोगात् । दुर्बलेनापि क्रमेणाज्यभागाङ्गत्वमाश्रित्य वचनम्। अनुवाक्याद्वयव्यवस्थार्थमिति वक्ष्यते। विद्वद्वाक्यविहितकर्मणोस्तु मन्त्रान्तरानवरोधात् पौर्णमास्यामावास्यासंज्ञाभ्यां तयोरेव प्रत्यभिज्ञानात् वाक्येन तत्र मन्त्रविधिसम्भवेन दुर्लभक्रमावलम्बनेन व्यवस्थार्थत्वस्य कल्पयितुमयुक्ततया गौरवस्य प्रामाणिकत्वात् पौर्णमासीसंज्ञके कर्मणि अग्निसोमप्रकाशिके अग्निर्वृत्राणि जंघनत् त्वं सोमासि सत्पतिः इति वार्त्रघ्नौ ऋचौ अमावास्यासंज्ञके च अग्निः प्रयत्नेन जन्मना सोमगीर्भिष्ट्वा वयम् इति वृधान्वत्यौ वा ते प्राप्ते इति .................त एव तयोरग्निसोमरूपामान्त्रवर्णिकी देवतानन्वनूच्येतेति श्रवणान्मन्त्रद्वयमनुवाक्यैव ततश्चानुवाक्याद्वयमेकस्मिन्नेव कर्मण्यनर्थकम्। याज्याभावात् यागानुष्ठानुपपत्तिश्च किञ्चैवमाज्यभागयोरनुवाक्याभावात् तदनुष्ठानमपि न घटत इति चेन्न। एकस्मिन् कर्मणि मन्त्रद्वयविधिबलात् एको मन्त्रपुरोनुवाक्या अपरो मन्त्रः याज्येति कथ्यते। न चैवमनूच्येते इत्यस्यानुपपत्तिः याज्यायामपि प्रैषे पश्चाद्भावेनानुशब्दाद्विरोधात् इत्याहुः।

युक्तं चेतत् - पुरोनुवाक्यत्वस्य याज्यासाधारण्याभावे हि पुरोनुवाक्याशब्देपुरश्शब्दो नार्थकस्स्यात्। नचैवमपि भिन्नदेवताप्रकाशयोः मन्त्रयोः कथं याज्यानुवाक्याभावः इति वाच्यम्। तत्राग्निसोमशब्दयोः मनोतास्थाग्निशब्दवत् सोमाग्न्युपलक्षकत्वाश्रयणेन तयोयाज्यानुवाक्याभावे बाधकाभावात्। न च लक्षणायां प्रमाणाभावः। ऋचमनूच्यहविषऋचा यजतीति श्रुत्या ऋच एव याज्यात्वावश्यम्भावात् - यस्य कस्यचिदनुपस्थितस्य ऋगन्तरस्य एतद्याज्यात्वकल्पनानौचित्येन उपस्थितस्य त्वं सोमेत्यादिमन्त्रस्यैव तत्कल्पनं न्याय्यम् इति तदुपपादकलक्षणाकल्पनस्य प्रामाणिकत्वात्। एवं चानुवाक्यासमाख्याबाधापत्तेः लक्षणायां प्रमाणाभावाच्च अनयोरेव अनुवाक्यैका याज्या चैकेति पक्षस्तत्र न युज्यते। किन्त्वेकस्मिन् कर्मणि मन्त्रद्वयस्य दृष्टार्थत्वात् विकल्प एव । तदनुरोधान्मान्त्रवर्णिकदेवताद्वयस्यापि विकल्पः। याज्या तद्देवतया कल्पनीया। वस्तुतस्तु वार्त्रघ्नीत्याद्येकपदोपादानसामर्थ्यात् द्वयोरपि मन्त्रयोस्साहित्यप्रतीतेः न विकल्पः । अतश्च मान्त्रवर्णिकदेवताद्वयस्यापि समुच्चयादेकैकस्य कर्मणः अग्निहोत्रादिवदावृत्तिः समुच्चितयाज्याद्वयकल्पनञ्च। अस्तु वा

मन्त्रद्वयेनापि लाघवात् व्यासज्यवृत्त्येकदेवताकल्पनम्। उभयप्रकाशकैकयाज्याकल्पनं चेति। कौस्तुभकृतः - क्लेशानुभवो निरर्थकः- उक्तरीत्या सत्यां गत्वावष्टदोषदुष्ट-विकल्पानौचित्यात्। आवृत्तिकल्पनस्य समुच्चितयाज्याद्वयकल्पनावहस्य गौरव-पराहतत्वात् मन्त्रद्वये चापि व्यासज्यवृत्त्येकदेवताकल्पनं तु रिक्तमेव । ऋचमूनच्यहविष ऋचा यजतीत्यादिभिरेकस्या एव ऋचः [४६]याज्यापुरोनुवाक्यात्वापत्त्या ऋग्द्वयस्य तथात्वानौचित्यात्। ऋचमनूच्याज्यभागस्यजुषाणेन यजतीति वचनानुरोधात्। जुषाणो अग्निराज्यस्यवे तु जुषाणस्सोम आज्यस्यहविषो वेतु इत्यनयोराज्यभागयोर्लभेऽपि तदनुवाक्यद्वयं अगत्या तव मम च कल्पनीयम् । तव तु विद्वद्वाक्यविहितकर्मणोर्याज्या कल्पनक्लेशो ह्यधिक इत्यास्तान्तावत्। तस्मात्सुलभैव विद्वद्वाक्यविहितकर्मणो मान्त्रवर्णिको देवता इति नारूपत्वम्। यदा विद्वद्वाक्यविहितो पौर्णमास्यमावास्यासंज्ञाभ्यामनूद्य यदाग्नेयादिवाक्यैरष्टाकपालद्रव्यमग्न्यादयश्च देवता विधीयन्ते इति नारूपत्वात्। एवं च तेष्वश्रुत यागकल्पनं विशिष्टविधिगौरवादिक्लेशाश्चानुभाव्याः[४७]।

नन्वेवं सति वाक्यभेदस्यादिति चेत् कोऽर्थः। किं पौर्णमास्यमावास्यारूपोद्देश्यानेकत्वाद्वाक्यभेदः प्राप्तकर्मानुवादेन द्रव्यदेवता-लक्षणानेकार्थविधानाद्वा । नाद्यः अर्धमन्तर्वेदिमिनोति अर्धं बहिर्वेदि इतिवत् पौर्णमास्यमावास्याशब्दाभ्यां लक्षितस्य प्रकृतयागत्वस्यैवोद्देश्यतावच्छेदकत्वाङ्गीकारेण तेन द्वयोरप्येकीकारात् वाक्यभेदाप्रसक्तेः। न द्वितीयः, तद्धितान्ते नाग्नेयपदेन शकेनैव[४८] देवताविशिष्टद्रव्यविशेषवाचिना विशिष्टस्यैकस्यैव प्राप्तभावनानुवादेन विधानोपपत्तेः। अथाष्टकपाल इति भिन्नपदेन द्रव्यस्योपादानात् पञ्चदशान्याज्यानीति अत्रैव विशिष्टबोधः। न च तद्धितान्तपदेनैकेन देवताविशिष्टद्रव्यप्रतिपादनमिति युक्तम्। द्रव्यदेवतादीनां परस्परानादरेण भावनयैव सम्बन्धावश्यम्भावेन ततः प्राक् परस्परवैशिष्ट्यप्रतीत्यसिद्धेः ततश्च द्रव्यदेवतयोः परस्परानभिज्ञत्वात् उभयत्रापि विधेः व्यापारः स्वीकार्यः इति अनिवार्यो वाक्यभेदः। एतेन गुणानां सिद्धरूपतया स्वतो विधेयत्वाभावात् प्राप्तकर्मानुवादेन काक्षादनेकगुणविध्यसम्भवात् अनेकगुणविशिष्टभावनैव विधेयेति

विशिष्टकर्मविधाविवात्रापि विधेस्सकृदेव व्यापारः इति परिहारः परास्तः। विशिष्टभावनागोचरतया प्रथमं प्रतीयमानस्यापि विधेः प्राप्तभावनापरत्वाभावेन गुणेष्वेव पर्यवसानस्य वाच्यतया तदावृत्तेरवर्धनीयत्वात्। यत्तु पुरोडाशादि द्रव्यस्य संस्कारः[४९] विध्यन्यथानुपपत्त्यैव प्राप्तेः आग्नेयादि वाक्यैः देवतामात्रविधानान्नवाक्यभेदः इति केषाञ्चित् समाधानम्। तदपि मन्दम् - कथञ्चित्पुरोडाशादेर्प्राप्तावप्यष्टत्वादेः प्राप्त्यसम्भवेन तद्विधानस्यावश्यकत्वात् तस्माद्दुष्परिहारो वाक्यभेद इति।

मैवम् - सास्यदेवतेतिद्रव्यदेवतासम्बन्धाधिकारविहित तद्धितान्तेन एकेनैवाग्नेयपदेन देवताविशिष्टं द्रव्यं प्रतिपाद्यते। अष्टाकपालपदं तु द्रव्यविशेषतात्पर्यग्राहकमिति न भिन्नपदोपादानम्। परस्परासम्बद्धयोः द्रव्यदेवतयोः प्रथमं भावनान्वयश्च सम्बन्धाधिकारविहिततद्धितभङ्गप्रसङ्गादसङ्गतः। अतः भावनान्वयात्प्रागेव वैशिष्ट्यप्रतीतेः प्राप्तकर्मानुवादेनापि यो अनिष्ठस्तान् विष्णवे शिपिविष्टाय शृते चरुमित्यादाविव विशिष्टविधिसम्भवान्न वाक्यभेदः। अतो यदाग्नेयादिवाक्ये रूपलाभस्य निष्प्रत्यूहत्वात् - विद्वद्वाक्ययोरपूर्वकर्मविधौ न किञ्चद्बाधकम्। एवं च ध्रौवाज्यं द्रव्यं देवता मान्त्रवार्णिकीति प्रथमपक्षे यदाग्नेयादिवाक्यानां कर्मविधायकत्वादाग्नेयादीनां कालयोगिनां च प्रयाजाज्यभागादीनां विद्वद्वाक्यविहितकर्मणोश्च तुल्यत्वात् फलसम्बन्धात् सर्वेषां कर्मप्राधान्यम्। तथाहि फलवाक्यस्थं हि द्विवचनान्तं दर्शपूर्णमासपदं न क्वचित्प्रसिद्धार्थकम् कालयोगिषु प्रकृत्यर्थप्रसिद्धावपि द्विवचनार्थाप्रसिद्धेः। अप्रसिद्धार्थकं च तन्नालम् आख्यातं विशेषे व्यवस्थापयितुम्। किन्तु राजसूयपदवद्यजिपरतन्त्रम्। यजिश्चाविशेषात् प्रकृतसकलयागवाचक इति तत्परतन्त्रं उपपदमपि तादृशमेव। नन्वेवमपि अकालयोगिषु प्रकृत्यर्थस्य द्वित्वायोगिषु द्विवचनार्थस्य चासम्भवात् कथं प्रकृतसकलयागनामत्वं उपपदस्येति चेत् सत्यम्। अत एव इदमुपपदं द्विवचनप्रतिरूपकमव्ययमेव न तु द्विवचनान्तं पदमित्याश्रीयते। प्रकृत्यंशयोस्तु अगत्या छत्रिन्यायेन कालयोगिषु तदितरेषु च लक्षणावृत्तिरविरुद्धा तस्मात् सर्वेषामपि फलसम्बन्धाद्राजसूयवत् समप्राधान्यम्।

यद्वा न प्रकृत्यंशयोः छत्रिन्यायेन लक्षणा नाव्युत्पन्नद्विवचनप्रतिरूपकाव्ययत्वकल्प्यम्। किन्तु प्रातिपदिकस्य कालयोगिषु प्रसिद्धिपाशाधिकरणन्यायेन प्रातिपदिकानुरोधेन पाशानिति बहुवचनस्य एकत्व इव प्रातिपदिकानुरोधेन द्विवचनस्यैव बहुत्वे लक्षणा स्वीक्रियते। नचैवं कालयोगिनां षण्णामेवफलसम्बन्ध इति सिद्धान्तस्य लब्धावकाशता आग्नेयादीनामिव विद्वद्वाक्यविहितयोः कर्मणोरपि कालयोगितया अष्टानामेव फलसम्बन्धसिद्ध्या सिद्धान्तप्रातिकूल्या वैकल्यात् । अथवा आग्नेयवाक्यविहितयोः कर्मणोः पौर्णमास्यमावास्याकालयोगात् द्वित्वयोगाच्च तावेवाधिकारवाक्यस्थदर्शपूर्णमासपदाभ्यां गृह्येते इति तयोरेव फलसम्बन्धः न षण्णाम्। यदि यदाग्नेयादिवाक्येन यागद्वयं किन्त्वावृत्तिरेव विकल्पसमुच्चय[५०] सम्भवात् । पौर्णमास्यमावास्यारूपगुणोपपत्तिरिति मतम् तदापि आवृत्तिमादायैव द्वित्वयोपपत्तिः।

यत्वेवमपि फलवाक्यगतदर्शपूर्णमासशब्दयोराग्नेयवाक्यविहितकर्मद्वयनामत्वे मानाभावः। तन्नामत्वं हि कालयोगनिमित्तलक्षणया वाच्यम्। लक्षणा च तात्पर्यग्राहकादिना। न च फलवाक्यगतदर्शपूर्णमासपदयोः आग्नेयवाक्यविहितकर्मद्वये तात्पर्यग्राहकम् । तत्सामानाधिकरण्यादिकं किञ्चिदिहास्तीति नवीनैरुक्तम्। तन्न। फलवाक्यस्थदर्शपूर्णमासपदयोः यजिसामानाधिकरण्यम् लक्षणां विना नोपपद्यते। लक्षणा च शक्यसम्बन्धिष्वेवेति कालयोगिष्वेव प्रातिपदिकस्य वृत्तिर्वाच्यम्। [५१]कालयोगिषु प्रयाजादिषु मुख्यार्थसम्बन्धाभावात् द्विवचनानुरोधेन द्वित्वयोगोप्यपेक्षितः। तथा च फलवाक्यस्थदर्शपूर्णमासपदं स्वस्य यजिसामानाधिकरण्यनिर्वाहायकालद्वित्वत्वयोगिनो यागान् प्रकृतेषु यागेषु मृग्यमाणमाग्नेयवाक्यविहितौ यागावसाद्य विश्राम्यतीति न काप्यनुपपत्तिः। यदाग्नेयादिवाक्ये रूपलाभ इति द्वितीयपक्षे तु आग्नेयादियागानां कालयोगिनाभावात् [५२]आज्यभागादीनां चाकालयोगित्वात् विद्वद्वाक्यविहितकर्मणोः कालद्वित्वयोगितया फलसम्बन्धः।

यत्त्वत्रापि तैरेवोक्तम् - विद्वद्वाक्यविहितकर्मणोः पौर्णमास्यमावास्यासंज्ञकयोः दर्शादिशब्दान्तरश्रवणवति फलवाक्ये प्रत्यभिज्ञानासम्भवादिति सम्भवे वा यदाग्नेयादिवाक्येष्विव उपांशुयाजवाक्ये विद्वद्वाक्यविहितकर्मप्रत्यभिज्ञापक-

पौर्णमास्यादिशब्दाभावात् तत्र गुणविध्यसम्भवे न कर्मान्तरविधानमावश्यकमिति कालयोगिकर्मणां त्रित्वेन द्विवचनानुपत्तितादवस्थ्याच्च न विद्वद्वाक्यविहितकर्मणोरेव फलसम्बन्ध इति । तदपि न दर्शपूर्णमासशब्दयोः पौर्णमास्यमावास्या-शब्दपर्यायत्वावधारणस्य प्रागेवाभिहितत्वात् प्रत्यभिज्ञोपपत्तेः। उपांशु याजमादाय त्रित्ववर्णनं च .................बाधादनुपपन्नम्। उपांशुयाजोत्पत्तिवाक्ये पौर्णमास्यादिपदाश्रवणेन तस्य उत्पत्तिवाक्यश्रुतकालकत्वाभावेन उत्पत्तिवाक्यश्रुत-कालयोः विद्वद्वाक्यविहितकर्मणोरेव झटिति फलवाक्यस्य दर्शपूर्णपदाभ्यां ग्रहणेन तयोरेव फलसम्बन्धावश्यसम्भवात् । यदि च तावब्रूतमग्नीषोमाविति प्रकृत्यैव उपांशुयाजमन्तरा यजति इति विधानादुपांशुयाजस्यापि सिद्धान्तवदुत्पत्तिवाक्यश्रुतकालतां समर्थयसे तदा यदाग्नेयादिवाक्येष्विवप्रत्यभिज्ञापकपौर्णमासीपदश्रवणात् तयोरेव गुणविधानमप्रत्यूहमिति न कालयोगिनां त्रित्वमिति सर्वथा विद्वद्वाक्यविहितकर्मणोरेव फलसम्बन्धः । न च विद्वद्वाक्ये प्रत्येकं एकैकस्यैव कर्मणो विधानात् तयोरप्युत्पत्तौ न द्वित्वयोग इति वाच्यम्। सिद्धान्तवत् पूर्वपक्षेऽपि प्रचयविशिष्टद्वित्वप्रतीत्युपपत्तेः ततश्च सर्वेषामपि अष्टानां द्वयोर्वा फलसङ्गतिः न षण्णामेव यागानाम्। एवं प्राप्ते अभिधीयते।

यच्छब्दैवं पदग्रासाद्वर्तमानापदेशतः।<br>
न विद्वद्वाक्ययोर्न्याय्याकर्मान्तरविधायिता॥<br>
न चाप्राप्तार्थकत्वेन लेटत्वं कल्पयितुं क्षमम्।<br>
प्राप्ताग्नेय्यादिषड्यागानुवादत्वस्य सम्भवात्॥<br>
तस्माद्विधेरिहाभावान्न विध्याभ्यासतो भिदा।<br>
न च तद्वाक्यसार्थक्यलाभाय विधिकल्पनम्॥<br>
समुदायानुवादेन तत्सार्थक्य सम्भवात्।<br>
समुदायाकृतिश्चैषा यागानां कालयोगिनाम्॥<br>
षण्णामेव फलप्राप्तिकरणात्स प्रयोजना।<br>
षण्णामेव फलप्राप्तिरिति च प्रागवर्णयम् ॥

य एवं विद्वान् पौर्णमासीं यजते इति वाक्यस्थेन यजिना पौर्णमासीकालयुक्ता यागाः त्रयः तन्त्रेणानूद्यन्ते तदनुवादरूपैकाभिधानावलम्बनेन चैकबुद्ध्युपरूढत्वापरनामधेयः एकसमुदायो निष्पाद्यते स एव समुदायः पौर्णमासीत्युपपदेनाप्यभिधीयते। [53]धातुना तन्त्राभिधानलब्धस्य समुदायस्यैव उपपदेन अभिधानादुपपदस्य एकवचनान्तत्वमप्युपपन्नम् । ननु फलवाक्यस्थद्विवचनान्तनाम्नः षट्स्विव विद्वद्वाक्ययोरेकवचनान्तनाम्नोरपि त्रिष्वनन्वितधात्वर्थेनाप्रसिद्धार्थताविशेषात् कथमुपपदानुसारेण विद्वद्वाक्यस्थयजत्योः कालयुक्तानुवादकल्पम् । ततश्च विद्वद्वाक्यस्थ नाम्नोरेव यजिपरतन्त्रतावश्यम्भावेन यजेश्च सन्निहितसर्वयागानुवादकतया तदनुसारेण तयोरपि सर्वप्रकृतयागानामत्वमेव स्यादिति चेन्न। यावदुक्थ्येनोपाप्नोति तदवदुपाप्नोति, यावदतिरात्रेणोपाप्नोति तदवदुपाप्नोति इति पौर्णमास्यमावास्या शब्दस्य व्यवस्थितार्थकत्व एष घटते। नान्यथेति । तदुपपत्यर्थं तयोर्न सर्वप्रकृतयागनामत्वम्। किन्तु कतिपयनात्वमेव। कतिपयनामत्वे च तत्तत्कालयुक्तकर्मनामत्वमेव न्याय्यमिति तदनुसारेण तत्तत्कालयोगिष्वेव विद्वद्वाक्यस्थ यजिवृत्तेरवश्यं वाच्यत्वात्। एवं च समुदायद्वयसिद्धौ तत्रोपपदस्य प्रसिद्धार्थत्वात्तदनुसारेण काम्स्यभोजिन्यायेन यजेः कालयोगित्वेष्वेववृत्तेः तेषामेव प्राधान्यम्।

ननु समुदायसिद्धावपि फलवाक्यगतदर्शपूर्णमासशब्दस्य न समुदायपरत्वम्। तस्य यजिसामानाधिकरण्यात् समुदायस्य च यागत्वाभावात् इति वाच्यम्। समुदायस्य यागत्वाभावेऽपि समुदायद्वारा लक्षणया समुदायिषु वृत्तिसम्भवेन यजिसामानाधिकरण्योपपत्तेः। पूर्वपक्षे च कालवाचक दर्शपूर्णमासशब्दस्य तात्पर्यग्राहकत्वाभावान्न कालद्वारा कालयोगिषु वृत्तिः, सिद्धान्ते तु विद्वद्वाक्येन समुदायकरणस्य आनर्थक्यापत्त्या तत्तद्बलादेव फलवाक्यगतद्विवचनान्तदर्शपूर्णमासशब्दस्य समुदायद्वारा समुदायिषु तात्पर्यं निश्चय इति वैषम्यम्।

एवं विद्वद्वाक्याभ्यां पौर्णमास्यमावास्यारूपसंज्ञाकरणबलात् तद्बलेनैव कालयुक्तानामेव प्रत्यभिज्ञाबलेनापि कालयुक्तानामेव फलसम्बन्धः इति मयुखमालिकाकृता दर्शितः पन्थाः। सोऽयं युक्तिविरोधादनादेयः । तथाहि- किं विद्वद्वाक्यस्थपौर्णमास्यमावास्याशब्दयोः समुदायवाचकत्वं वा नाद्यः। कतिपयनामत्वे च

तत्तत्कालयुक्तकर्मनामत्वमेव न्याय्यम्। कालयुक्तानामेव प्रत्यभिज्ञया संज्ञाबलेनापि कालयुक्तानामेव फलसम्बन्धः इत्यव्याघातात्। धातुना तन्त्राभिधानलब्धसमुदायः उपपदेनाप्यभिधीयते । समुदायद्वारा लक्षणया समुदायिषु वृत्ति रित्याद्युक्तिविरोधात् । वस्तुतस्तु एवं च समुदायसिद्धौ तत्रोपपदस्यप्रसिद्धत्वादिति समुदायद्वारा समुदायिषु लक्षण इत्युक्त्या च विद्वद्वाक्यपौर्णमासीपदस्य समुदायवाचकत्वमेव तवाभिमतम्। तच्चायुक्तम् - समुदाययोः कालयोगाभावेन[५४] न तत्प्रख्यन्यायविषयता विद्वद्वाक्यस्थपौर्णमासीपदस्य तत्र वृत्त्यसम्भवात्। किञ्च विद्वद्वाक्य अपि पौर्णमासीपदं यजिसमानाधिकरणमेव यागसमुदायस्य यजिकर्मत्वासम्भवेन वैयधिकरण्येनान्वयायोगात् आग्नेयादिपदानां अर्थाक्षिप्तकर्मत्वानुवादमाश्रित्य पौर्णमासीसंज्ञकान् यागान् करोतीति वा द्वितीयायास्तृतीयार्थकत्वलक्षणामाश्रित्य पौर्णमासीसंज्ञकैः यागैरिष्टं भावयेदिति वान्वयो वाच्यः। ततश्च यथैव फलवाक्यस्थदर्शपूर्णमासशब्दयोः यजिसामानाधिकरण्यबलात् समुदायिपरत्वमभ्युपगच्छसि तथैव विद्वद्वाक्यस्थपौर्णमास्यमावास्यापदयोः तद्बलादेव समुदायिपरतां कुतो नातिष्ठथाः इति विस्मयामहे।

तस्मादिदमत्र तत्त्वम् - प्रागुक्तरीत्या विद्वद्वाक्यस्थयजिना श्रुतपौर्णमासीकालानां त्रयाणां यागानां तन्त्रेणानुवादात् समुदायप्रतीतिरुपपद्यते। पौर्णमासीपदं च तत्प्रख्यन्यायेन त्रयाणां नामधेयम्। एकवचनं तु स्वशक्यैकत्वाश्रय-समुदायघटकसमुदायवृत्तिसम्बन्धेन बहुत्वलक्षकम्। एवममावास्यावाक्येऽपि द्रष्टव्यम्। ततश्च विद्वद्वाक्ययोः समुदायद्वयसिद्धिः प्रयोजनम्। तत्प्रयोजनं च कालयोगिनां पौर्णमास्यामावास्याशब्दपर्यायत्वात्। कालयोगिनां षण्णां नामधेये तत्रत्य द्विवचनं तु स्वशक्यद्वितीयार्थकर्मत्वाश्रय समुदायघटकसमुदायि[५५] वृत्तित्वसम्बन्धेन बहुत्व-लक्षकमिति षण्णामेव तेषां फलसम्बन्धसिद्धिरिति। विद्वद्वाक्याभ्यां समुदायासिद्धौ उक्तशक्यसम्बन्धासिद्धेः द्विवचनस्य बहुत्वलक्षकता न स्यात्। यद्यपि समुदायद्वयसिद्धावपि द्विवचनस्य स्वशक्यद्वित्वाश्रयपौर्णमास्यामावास्याकालद्वय-सम्बन्धियागवृत्तित्वसम्बन्धेन बहुत्वलक्षणता सम्भवत्येवेति विद्वद्वाक्याभावेऽपि षण्णामेव फलसम्बन्धसिद्धिश्चाविकलेति चोद्यमुन्मिषति तथापि तदभावे कालद्वित्व-

योगिनोराग्नेययोरिव द्विवचनान्तदर्शपूर्णमासपदस्य शक्त्यावृत्तिसम्भवेन तयोरेव फलसम्बन्धात् बहुत्वलक्षणायां प्रमाणाभावेन षण्णां फलसम्बन्धो न सिद्ध्यतीति तत्सिद्ध्यर्थं समुदायद्वयप्रदायकं विद्वद्वाक्यद्वयमावश्यकम् - विद्वद्वाक्याभ्यां च समुदायद्वये निष्पादिते तदानर्थक्यभिया तत्प्रयोजनजिज्ञासायां फलवाक्यस्थद्विवचनस्य उक्तसमुदायद्वयघटितशक्यसम्बन्धेन बहुत्वलक्षणातात्पर्यग्राहकत्वावसायात् सिद्ध्यत्येव षड्यागानां फलसम्बन्धः। न च कर्मान्तरविधिपरतयाप्यानर्थक्यपरिहारसम्भवात् कथं तद्भिया तयोः फलवाक्यस्थद्विवचनस्य उक्तसम्बन्धेन बहुत्वलक्षणातात्पर्य-ग्राहकत्वाध्यवसायमिति वाच्यम्। कर्मान्तरविधिपरत्वस्य यच्छब्दादिना विघटितत्वात्। उक्तप्रयोजनसम्भवे कर्मान्तरविधेर्गौरवापहतत्वाच्च।

ननु यद्याग्नेयभेदे प्रमाणं लभ्यते ततस्तयोरेव कालद्वित्वयोगितया फलवाक्यस्थद्विवचनान्तदर्शपूर्णमासपदेन ग्रहणात् फलसम्बन्ध्यापत्त्या बहुत्वलक्षणायां प्रमाणाभावात् षण्णां फलसम्बन्धो न स्यात् । तदेव तु न लभ्यते न तावदनुपादेयगुणयोगरूपात् प्रकरणान्तराद्भेदः, तस्य सन्निधौ त्वविभागादिति न्यायेन[५६] सन्निधावप्रवृत्तेः। नापि कालरूपगुणाद्भेदः द्वेधा हि गुणस्य भेदकत्वम् उत्पत्तिशिष्टगुणावरोधे वाक्यभेदापत्तौ च उत्पत्तिशिष्टगुणविरोधस्त्वनाशङ्कनीयः । वाक्यभेदस्तु यद्यपि कालस्यानुपादेयत्वेन उद्देश्यत्वादुद्देशानेकत्वनिबन्धनरसम्भाव्यते। तथापि कालस्याज्ञातज्ञापनविषयत्वरूपविधेयत्वात्त्वेनामावास्यायामपराह्णे[५७] पिण्डपितृयज्ञेन चरन्तीत्यत्रेव न वाक्यभेदः न चैवमप्येकस्मिन् कर्मणि पौर्णमास्यमावास्यारूपकालद्वयस्य न समुच्चयेन निवेशः विरोधात्। नापि विकल्पेन च शब्दश्रवणात् अच्युतत्वोक्तेश्च तस्मादसम्भवद्विकल्पसमुच्चयकाललक्षणगुणवशादेव यागभेद इति वाच्यम् । एकस्यैव कर्मणः आवृत्तिरूपगुणमादायापि कालद्वयरूपगुणनिवेशोपपत्तेः तावता भेदानापातनात्। यत्तु गुणानुरोधेन प्रधानावृत्ति अयोगात् भेदो दुर्वार इति कैश्चिदुक्तम् तत्तुच्छम् - तथा सति सायं प्रातःकालभेदेनाग्निहोत्रस्यापि भेदापत्तेः। किञ्च संख्यातिरिक्तभेदप्रमाणानां वाक्यान्तरविहितकर्मप्रतियोगिकभेदबोधकतानियन्तव्या इत्यस्य दीपिकायाम्

एतदधिकरणदावुक्तत्वात्...............न गुणादेः स्ववाक्यविहितकर्मनिरूपित-भेदबोधकत्वसम्भवः तस्मादाग्नेयैकत्वमेव युक्तिमत्। [५८]अत एव एककर्मणिविकल्पो अविभागो हि चोदनैकत्वात् इत्याष्टमिकाधिकरणे व्यवस्था प्रकृतौ दृष्टा प्राप्यते विकृतावपि। प्रकृतौ सार्थकीत्येषा विकृतौ नातिदिश्यते। इति। आग्नेयविकारे सौर्ये चतुर्होत्रापौर्णमास्यामभिमृशेत् पञ्चहोत्राममावास्याम् इति मन्त्रद्वयस्य यथा प्रकृति व्यवस्थया प्रयोगः इति प्रापय्य चतुर्होत्रापौर्णमासी पञ्चहोत्रामावास्यामिति समुदायद्वारेणैव मन्त्रयोरुपदेशात् समुदायवतः आग्नेयस्याङ्गं भवन् मन्त्र एकार्थत्वाद्विकल्प्यते तत्र पौर्णमासिकहविरन्तरैस्सहाभिमृश्यमानमाग्नेयमवैषम्याय चतुर्होत्राभिमृष्टम्। तथा अमावास्याकाले पञ्चहोत्रेत्यार्थिकी व्यवस्था। न ह्यार्थिकं चोदकः प्रतिदिशतीत्यव्यवस्थेवेति सिद्धान्तितमुपपद्यते यद्यपि चाग्नेययागभेदेऽपि विशेषाग्रहणात् सौर्य................स्याग्नेयद्वयविकृतित्वेनमन्त्रयोरव्यवस्थेति स्थापयितुं शक्यते। तथाप्याग्नेयः पौर्णमास्यमावास्ययोरुत्पन्न उभयप्रत्यभिज्ञापक इत्यादि व्यवहारदाग्नेयैकत्वमेव पार्थसारथिमिश्राणामभिमतम्। तथा च कथमाग्नेययोः कालद्वित्वोभययोगात् फलसम्बन्धापत्तिरित्युक्तमिति। अत्र ब्रूमः- आग्नेयभेदाभावे अप्यग्निहोत्रवदुक्तरीत्या तदावृत्तिरनिवार्या। अतस्तामादायैव तत्र द्वित्वयोगोपपादनसम्भवात् स्यादेव तस्य फलसम्बन्धापत्तिः। आवृत्तिमादायै-कादशादिसंख्याशब्दा अप्युपपद्यन्ते किमुत द्विवचनमिति दिक्।

कौस्तुभकारस्तु - गुणादेवात्र भेदः । तथाहि - यो हि पदार्थः भेदावृत्तिं विना कर्मान्वययोग्यः सः उत्पत्तिवाक्यस्थः कर्मभेदं बोधयति उत्पन्नवाक्यस्थस्तु तदावृत्तिम् व्यक्तं चैतत् संख्यायाम् ततश्च समुचितकालद्वयरूपगुणोऽपि भेदमावृत्तिं विना कर्मान्वयमप्रतिपाद्यमानः उत्पत्तिवाक्यस्थत्वादिह कर्मभेदं बोधयति उत्पन्नवाक्यस्थस्तु सायं प्रातः कीलरूप आवृत्तिम् - अतः एकस्मिन् कर्मणि असम्भवन्निवेशो गुण एव समुचितकालद्वयरूपो भेदकः। यथाचैवं सति संख्यायाः न गुणान्तर्भावः तथा संख्याधिकरणे वक्ष्यते - प्रमाणबलेन च गुणस्य स्ववाक्यविहितकर्मप्रतियोगिक-भेदबोधकत्वेऽपि न दोषः - अत एव पार्थसारथ्युक्तम् उत्पत्तिशिष्टगुणावरोधे

वाक्यभेदापत्तौ च गुणात्कर्मभेदः द्वैविध्यं प्रमाणाभावात् इत्यपास्तम्। वषट्कर्तुः प्रथमभक्ष इत्यत्र एकप्रसरताभङ्गप्रसङ्गेन तस्य भेदकत्वाङ्गीकारात्।

न च वषट्कर्तृभक्षानुवादेन प्राथम्यविधौ विशिष्टोद्देशे वाक्यभेदापत्तेः तद्भियैव गुणस्तत्र भेदक इति वाच्यम्। वषट्कर्तृत्वे निमित्ते भक्षानुवादेन प्राथम्यविधावपि विजातीयोद्देशे तदभावादेकप्रसरताभंगभयेनैव तस्य भेदकत्वात् । अतस्सिद्धो अत्रापि गुणाद्भेदः - भेदोऽपि चात्र संख्यावदनेकत्तबोधनद्वारैव बोध्यते न तु किञ्चित्प्रतियोगिकः प्रमाणान्तरात्प्रतियोगिनः पूर्वमसिद्ध्या तन्निरूपितभेदस्य बोधयितुमशक्यत्वात् तस्मादाग्नेयभेद इत्यवोचत्।

अत्रेदं चिन्त्यम् -

स्वाभिमताग्नेयभेदसिद्ध्यर्थमेवोत्पत्तिवाक्यस्थत्वे भेदबोधकत्वं उत्पन्नवाक्यस्थत्वे त्वावृत्तिबोधकतेति न्यायस्य संख्यामात्रनिष्ठस्य कालरूपगुण-साधारण्यकल्पनाप्रमाणान्तरेण विना[५९] न युक्ता । न च संख्यात्वापेक्षया-भेदावृत्त्यन्यतरनिर्वाह्यकर्मान्वयकपदार्थत्वस्य सामान्यरूपतया लघुत्वात् तदवच्छेदेनैव उक्तन्यायकल्पनं न्याय्यमिति वाच्यम्। संख्याकालव्यतिरिक्तभेदकपदार्थत्वापेक्षया संख्यातिरिक्तभेदकपदार्थत्वस्यापि तथात्वेन तदवच्छेदेनैव वाक्यान्तरविहित-कर्मप्रतियोगिकभेदबोधकतानियमकल्पनौचित्येन गौरवलाघवयोरविशेषात् । इयांस्तु विशेषः - तव कर्मभेदात् गौरवम्। मम तु ऐकर्म्याल्लाघवमिति। किञ्चैवं सति संख्यायाः गुणान्तर्भावो दुर्वारः उत्पन्नवाक्यस्थ एव गुणादिर्भेदकः संख्यातूत्पत्तिवाक्यस्थैव भेदिकेति हि शास्त्रदीपिकादिषु गुणाद्यपेक्षया संख्यायाः वर्णितः। तथा च भेदवर्णितं उत्पत्तिवाक्यस्थस्यापि गुणस्य भेदकताङ्गीकुर्वता त्वया दूरीकृतमित्यसमुचितकाल-रूपगुणवत्संख्याया अपि गुणत्वेनैव भेदकत्वा दुष्परिहरा।

यत्तु त्वया संख्याधिकरणे उत्पत्तिगतैव संख्याप्रमाणान्तरसिद्धौत्पत्तिकस्यैव कर्मणो अनेकत्वमात्रबोधिका तिस्र आहुती जुहोतीत्यत्र शब्दान्तरादिनैव उत्पत्तिपरत्वावधारणम् न तु संख्यायास्तत्र व्यापारः अपि तु अनेकत्वमात्रबोधने गुणस्य

तु सत्यप्याग्नेयाद्युत्पत्तिवाक्यगतस्य भेदकत्वे उत्पन्नवाक्यगतस्यापि अनिविशमानतया स्वविशिष्टकर्मोत्पत्तिबोधनद्वारा भेदबोधकत्वमिति वैषम्यमुक्तम्।

तदयुक्तम् -

असमुचितकालरूपगुणस्याप्युत्पत्तिवाक्यगतस्यैव प्रमाणान्तरसिद्धोत्पत्तिककर्मनिकत्वबोधकतया संख्यायां उक्तस्य गुणाद्भेदबोधकत्वस्य तत्रापि सत्त्वेन तत्रापि गुणान्तर्भावनापत्तेः[६०]। यदि चोक्तभेदकत्वसत्त्वेऽपि कालस्य गुणान्तर्भावं स्वीकुरुषे तदा संख्याया अपि गुणान्तर्भावः कुतो न स्यात् , न च संख्यात्वावच्छेदेन उत्पत्तिवाक्यस्थस्य गुणस्य कर्मभेदकत्वमिति नियमः गुणत्वावच्छेदेन त्वनियमः इति भेदस्सुवच इति वाच्यम्। कालरूपगुणे त्वदुक्तरीत्या संख्यावदुक्तनियमसत्त्वेन गुणत्वावच्छेदेनानियमासंभवात्। न च गुणविशेषे नियमसत्त्वे अपि गुणत्वावच्छेदेन नियमाभावो अस्त्येवेति वाच्यम्। हन्त, [६१]य एवं नियमः कालो गुणविशेषतामापाद्य गुणान्तर्भावं न विरुणद्धीति। केयं राज्ञामाज्ञा ? न च कालस्य संख्या तुल्ययोगक्षेमत्वात् गुणबहिर्भावे संख्यात्वस्यानाशङ्कनीयतया परिशेषात् प्रकरणान्तरन्यायेनैव समर्थनीयः स च निरस्तः। तस्मादुत्पत्तिवाक्यगतो यो यं समुचितकालद्वयरूपो गुणः सः कर्मणः आवृत्तिमेव लाघवात् कल्पयति तावतैव ...स्वनिवेशलाभेन गौरवकरकर्मभेदकत्वकल्पने[६२] निरादरत्वात्। अन्यथा अहरहस्सन्ध्यामुपासीत इत्यादावपि असमुच्चेयः कलात्मा गुणः कर्मभेदमेवाहेत्, नावृत्तिमिति न किञ्चदेतत्। तस्मादस्माभिर्दर्शितमेव पन्थानं प्रतिसन्धाय आग्नेये कालद्वित्वोभययोगः उपपादनीयः। एवं चाग्नेयस्यैव फलसम्बन्धापत्तेः, तद्व्यावृत्तिफलकबहुत्वलक्षणापेक्षितशक्यसम्बन्धघटकसमुदायद्वयनिष्पादनद्वारा षण्णामेव फलसंयोजनपरतया विद्वद्वाक्ययोस्सार्थक्यात् न कर्मान्तरविधि :।

किञ्च रूपफलाभावादपि न सः। कथञ्चिद्द्रव्यलाभोपपादनेऽपि देवतायाः कुतो अप्यलाभाच्च। न च वार्त्रघ्नीवृन्वतीरूपमन्त्रवर्णतस्तल्लाभः इत्युक्तमिति वाच्यम्। उक्तमन्त्राणां लिङ्गक्रमाभ्यां आज्यभागाङ्गत्वावधारणम्। [६३]वार्त्रघ्नीपूर्णमासेनोच्यते। वृधन्वती अमावास्यायाम् इति वचनन्त्वाज्यभागयोर्मन्त्रव्यवस्थापनमात्रं लाघवाद्विधत्ते, न तु विद्वद्वाक्यविहितयोः कर्मणोरत्यन्ताप्राप्तमन्त्रविधायकं गौरवात्। तथा च

मन्त्रस्याग्निसोमशब्दयोः मनोतान्यायेन लक्षणापत्तेः। आज्यभागयोरनुवाक्याद्वय-कल्पनाबाधापत्तेः अबाधेनैवोपपत्तौ लिङ्क्रमयोर्वचनेन बाधानौचित्याच्च एवं वार्त्रघ्न इत्यादिवचनेन पौर्णमास्यमावास्यापदलक्षितयोः तत्कालीनकर्माङ्गभूताज्यभागयोरुक्त-मन्त्राणां व्यवस्थामात्रं क्रियते। पौर्णमासीकालीने कर्मणि यावाज्यभागौ तयोर्वार्त्रघ्नौ अमावास्याकालीने कर्मणि यावाज्याभागौ तयोर्वृधन्वत्यौ इति। न चाज्यभागयोः कालयुक्तयागाङ्गत्वेसिद्धे एषोक्तव्यवस्था घटते। वचनस्य व्यवस्थापरत्वे च सिद्धे रूपालाभात्। विद्वद्वाक्ययोः कर्मान्तरविधानासंभवः। न कालयुक्तमात्रानुवादकतया तेषामेव फलसम्बन्धात्। [६४]फलवत्सन्निधावफलं तदङ्गमिति न्यायेन आज्यभागयोः कालयुक्तयागाङ्गत्वसिद्धिरित्यन्योन्याश्रय इति शङ्कनीयम्। प्रागुक्तरीत्या यच्छब्दाद्युपबन्धाभ्यासन्यायाप्रसराच्च विद्वद्वाक्ययोः कालयुक्तमात्रानुवादकत्वनिश्चय-सम्भवेन वार्त्रघ्नी इत्यादि वचनस्य व्यवस्थाया अवधारणात् प्रागेवाज्यभागयोः कालयुक्तयागाङ्गत्वसिद्धेरन्योन्याश्रयानवकाशात्।

नन्वेवं कर्ममुखेन व्यवस्थाङ्गीकारे पौर्णमास्यमावास्याशब्दयोः कर्मणि तदङ्गभूताभागयोर्वा लक्षणाकल्पनसाम्यं च प्राधान्येन स्यात् । अतः पौर्णमास्यां काले यावाज्यभागौ तयोः वार्त्रघ्न्यौ इत्येवं कालमुखेनैव व्यवस्थाविधिरास्थेयः। मैवम् - तथापि मन्त्रवर्णतो देवतालाभः इति त्वदिष्टस्यसिद्धेः किं वाज्यभागयोः प्रतिपदिक्रियमाणत्वेन पौर्णमास्यां काले कर्तव्यौ यावाज्यभागौ इति न कालमुखेन व्यवस्थाविधिसंभवः। न चैवमाग्नेयादिप्रधानकर्मणोऽपि प्रतिपाद्येवानुष्ठीयमानतया कर्ममुखेनापि व्यवस्था नोपपद्यते इति वाच्यम् प्रयोगारम्भद्वारा प्रधानकर्मणः पौर्णमासीकालीनत्वस्य संप्रतिपन्नत्वात्। एवं चाग्नीषोमीयविकाराणां अमावास्यायामनुष्ठानेऽपि वार्त्रघ्नी प्राप्तिः सान्नाय्यविकाराणां पौर्णमास्यामनुष्ठानेऽपि वृधन्वन्ती प्राप्तिरिति मर्यादा रक्षिता भवति। पौर्णमास्यमावास्याशब्दयोरुक्तरीत्या मुख्यार्थानुपपत्तेः तत्कालीनकर्मणि लक्षणा च न दुष्यति। तदनुरोधेन च येन कर्मणेर्त्सेत् तत्र जायान् जुहुयादितिपादाविव सप्तम्याः प्राधान्यलक्षणाप्युचितैव। तस्माद्वार्त्रघ्न्यादिमन्त्राणां आज्यभागाङ्गत्वात् न मन्त्रवर्णतो देवतालाभः नापि

यदाग्नेयादिवाक्येभ्यस्तल्लाभः। विद्वद्वाक्यप्राप्तयागानुवादेन द्रव्यदेवतारूपानेकगुणविधौ वाक्यभेदापातात्। न चैवं विशिष्टविधिस्थलेऽपि वाक्यभेदः तत्र हि श्रुतस्य विधेः विशिष्टभावनाविधान एव व्यापारः। न तु वाक्यभेदः। न चेह तथा सम्भवति, भावनास्वरूपं विशेष्यम्मन्यतः प्राप्तत्वादुपेक्ष्य विशेषणेष्ववतरतो विधेः प्रतिविशेषणं तात्पर्यतः पर्यवसानं वाच्यम्। एकेन विहितेन इतरस्यानाक्षेपात्। न चैकविशेषणविशिष्टापरविशेषणविधिस्सम्भवति [६५]गुणानां च परार्थत्वादसम्बन्धः इति न्यायेन तेषां परस्परवैशिष्ट्यासिद्धेः। अतो दुर्वारा प्रतिगुणं विध्यावृत्तिः प्राप्तकर्मानुवादेनानेकगुणविधानस्थले। न चैवं यागानुवादेन जातिलिङ्गसंख्याकारकलक्षणा नैकगुणविधायके शाखान्तरीये पशुना यजेतेति वाक्येऽपि विध्यावृत्तिप्रसंग इति वाच्यम्। तत्र प्रत्ययाभिधेयस्य कारकस्य पश्वेकाधिकरणन्यायेन[६६] प्रधानत्वाद्यथायोग्यं समानाभिधाश्रुत्या पदश्रुत्या च तत्र जातिलिङ्गसंख्याकारकवैशिष्ट्यस्यक्रियान्वयात्प्रागेव बोधनात् प्राप्तकर्मानुवादेन जात्यादिविशिष्टस्यैकस्यैव कारकस्य विधानेन विध्यावृत्त्यप्रसक्तेः.। विधिं विनैवान्वयव्यतिरेकाभ्यां जात्यादिद्रव्यपरिच्छेदद्वाराकारक-शक्तियोगस्य लोकसिद्धत्वात्। एवं तयंस्विष्टकृतं यजतीति[६७] समासस्थलेऽपि एकेन समस्तपदेन संख्याविशिष्ट संख्येयबोधनात् संख्येये संख्या वैशिष्ट्यस्य च विनापि नालोकतः एकत सिद्धेरवाक्यभेदो द्रष्टव्यः।

न चैवं ऋत्विग्भ्यो दक्षिणां ददाति[६८] इति विहितदक्षिणानुवादेन संख्येयविशिष्टद्वादशसंख्याविधायिनि तस्य द्वादशशतं दक्षिणा इत्यत्र विध्यावृत्तिलक्षणेन समस्तेन वा पदेन संख्यासंख्येययोरनुपादानेन तद्वैशिष्ट्यस्य विधिर्न बोधयितव्यत्वादिति वाच्यम्। ऐकपद्याभावेऽपि तस्येति षष्ट्यैव संख्या संख्येयबोधनेन तत्र विधिव्यापारानपेक्षणात्। न चैवमभ्युदयेष्टौ ये अनिष्ठाः तान् विष्णवे शिपि विष्टाय शृते इत्यत्र श्रुतानिष्ठानुवादेन विष्णु शिपिविष्टोभयविधानाद्वाक्यभेदो दुष्परिहरस्स्यात्। न हि शिपिविष्योपस्थिति न वा विष्णो शिपिविष्टत्ववैशिष्ट्यं प्रमाणान्तरसिद्धमिति चेत् अत्र पार्थसारथिमिश्राः - शिपिभिः= रश्मिभिः विष्टः= आविष्टः = शिपिविष्टः इत्येवं शिपिविष्टशब्दस्य यौगिकत्वात् तेन विष्णुशब्देन सामानाधिकरण्यात् तद्बलेन

शिपिविष्टत्वविशिष्टस्य विष्णोः शिपिविष्टत्ववैशिष्ट्यं किमित्ते विष्णो परिचक्ष्यं भूत्प्रयद्वद्वक्षे शिपिविष्टो अस्मि, यः पशोर्भूमा या पुष्टिस्तद्विष्णुश्शिपिविष्टः, शिपयो रश्मयः अत्र उच्यन्ते तैराविष्टो भवती त्यादि मन्त्रार्थवादनिरुक्तादिभिः प्रसिद्धम्। अतो यो विष्णुः शिपिविष्टः सः शृतस्य क्षोदिष्टानां च देवतेत्येकार्थविधानाद्विधिप्रत्ययस्य नासकृदुच्चारणापत्तिरिति परिजहुः।

कौस्तुभकारस्तु -

नैतद्युक्तम् - इत्यनन्यपरमन्त्रार्थवादकृतप्रासध्यावलम्बनेनापि वैशिष्ट्योपपत्तौ सुतरां द्रव्यगुणयोः वास्तविकलोकप्रसिद्धविशेषणविशेष्यभावेन वैशिष्ट्योपपत्तेः। पञ्चदशान्याज्यानि इत्यत्रापि स्तोत्रानुवादेन संख्याविशिष्टाज्यविधाने वाक्यभेदापत्तेः। अतस्तत्रापि प्राप्तकर्मानुवादेनानेकविधानादस्त्येव वाक्यभेदः। अत एव तत्र द्रव्यदेवता विशिष्टभावनान्तरविधिपक्षमेवाश्रयिष्यामः। तत्पक्षे दूषणानि च तत्र परिहरिष्यामः इत्यदूषयन् । तच्चिन्त्यम् । मन्त्रार्थवादादेरन्यपरतया वैशिष्ट्यप्रसिद्धिमात्रस्य अप्रतिहतत्वात् निरुक्तस्य तदर्थवर्णनेदु............स्थानन्यपरत्वाच्च। यद्यपि च द्रव्यगुणयोर्विशेष्यभावेन लोकतः प्रसिद्धावपि पञ्चदशान्याज्यानि इत्यत्र विष्णवे शिपिविष्टेत्यत्रैव न श्रुत्या सामानाधिकरण्यम् । पञ्चदशशब्दस्य आकृत्यधिकरणन्यायेन संख्यारूपगुणवाचिनो द्रव्यवाचकाज्यपदसमानार्थकत्वाभावात्। अपि तु लक्षणायैव तद्वाच्यमिति लक्षणाभीत्यैव परस्पर वैशिष्ट्यानादरेण पृथगेव क्रियासम्बन्धोऽभ्युपगन्तव्यः। अत एव अरुणया एकहायन्या क्रीणातीत्यादौ गुणद्रव्ययोस्सामानाधिकरण्यं लक्षणापेक्षितमिति तद्भिया तत्र द्रव्यवैशिष्ट्यानादरेण केवलगुणस्यैव क्रियान्वयस्स्वीकृतः। अतः पञ्चदशान्याज्यानीत्यत्र प्राप्तकर्मानुवादेन विशिष्टविध्यसम्भवात् वाक्यभेदो दुर्वारः। न हि विष्णु शिपिविष्टपदयोस्सामानाधिकरण्यं लक्षणापेक्षा शिपिविष्टपदस्य यौगिकत्वात् , अतोऽत्र प्राप्तानुवादेन विशिष्टविधिसम्भवान्न वाक्यभेद इति वैषम्यम्। एतदेवानुसन्धायोक्तम् शास्त्रदीपिकायाम् शिपिविष्टशब्दो हि यौगिकश्शक्नोति सन्निहितेन विष्णुशब्देन श्रुत्यैव सामानाधिकरण्यं प्राप्तुम् येन प्रकृते प्रवृत्तिः न स्यात्। किन्तु तदसम्बन्धानिश्चयः सचात्र इति न वृत्त्यनुपपत्तिः। अतो

द्रव्यदेवतयोः क्रियासम्बन्धात्प्राग् वैशिष्ट्यानुपपत्तेः पञ्चदशान्याज्यानीत्यतैव प्राप्तकर्मानुवादेनानेकविधाने वाक्यभेदो दुर्वार इत्याहुः।

एवं च विद्वद्वाक्यविहित कर्मानुवादेन यदाग्नेयादिवाक्ये गुणविध्यसम्भवात् द्रव्यदेवताविशिष्टयागान्तरस्यैव तत्र विधानात् विद्वद्वाक्यविहितकर्मणोस्सुदृढमरूपत्वम्। ततश्च विद्वद्वाक्ययोः कर्मान्तरविधायित्वायोगात् समुदायानुवादकत्वमेव साधीयः इत्यनुमतिदृष्ट्या परेषां फलसम्बन्धघटनं स्वप्रयोजनम्।

इति श्री वादिहंसाम्बुदार्यवंशावतंस वाजपेयसर्वपृष्ठस्तोमाप्तोर्यादियजि श्रीनिवासाचार्यनन्दन श्रीमद्रघुनाथाचार्यदीक्षितसूनोरात्रेयवेङ्कटाचार्ययज्वनः कृतिषु न्यायपद्मं समाप्तम्॥

॥आत्रेयवेङ्कटाचार्ययायजूकाय नमः॥

शुभम्

# पादटिप्पणी

१. विश्वगुणादर्शचम्पूः, श्लो ३

२.एम्. कृष्णमाचार्यकृतं संस्कृतसाहित्यचरितम्

३.न्यायप्रकाशे - उद्भिदा यजेत इत्यादीनामधिकारात् ।
तत्र हि यागो विधीयताम् । ......इत्यस्ति।

४. धात्वर्थस्य

५. वाचित्वमन्यथान्वयानुपपत्तेरिति।

६.न्यायप्रकाशे- तदभावादिति पाठः उपलभ्यते ।(सं)

७.गौरवाश्रयणम् , इति स्यात् (सं)

८. पू.मी.द. ३-८-२०

९. ४-२-१-१ सूत्रम्

१०. पू.मी.द. ३-६-१८

११. पू. मी. द. द्वि. अ. द्वि. पा. तन्त्रवार्तिके उक्तम्। उपोद्घातप्रसक्तानुप्रसक्तादौ गते अधुना शब्दान्तादिभिर्भेदो लक्षणार्थो अभिधीयते।

१२. धनुश्चिह्नान्तर्गतो भागो अस्माभिरस्संयोजितः(सं)

१३. तद्विध्य (सं)

१४. पू. मी.द. १०-७-२० आपस्तम्बश्रौतसूत्रम् -७-६।

सू॥ स्वाहा देवेभ्य इति पूर्वं परिवप्यं हुत्वा जुह्वामुपस्तीर्य हिरश्यशकलमवधाय कृत्स्नां वपामादाय हिरण्यशकलमुपरिष्टात्कृत्वाऽभिघारयति॥९॥ ३१॥१७००॥ एवं पञ्चावत्ता भवति॥१०॥३२॥१७०१॥ चतुरवत्तिनोऽपि पञ्चावत्तैव स्यात् ॥११॥३३॥१७०२॥

(परिवप्यपदार्थः जहूपदफलंवपायामवदाम्त्रविरहहेतुः)

(भा) परिवप्यमिति होमनाम संव्यवहारार्थमे। हुहूग्रहणादिरैव विरण्यहोमे हुह्वामुपस्तरणाभिघारणे। शतकृष्णलायामुपस्तरणाभिघारणे न भवत इति ख्याप्यते। नावदानमन्त्रो वपायाः कृत्स्ना यस्मान्नावखण्ड्यते तस्मादर्थलोपन्निवृत्तिः।

(परिवप्यर्थे मानम्)

(वृ) परिवप्य - रार्थमे- पूर्वौ परिवप्यावभिहूयमानावित्यादिषु पूर्वं परिवप्यमिति निर्देशात् अभितो वपां जुहोतीति कालवचनः, न देशवचन : ।

(जुहूग्रहणप्रयोजनोपपत्तिः)

जुहूग्र-ख्याप्यते - वपाहोमे जुह्वाः प्राप्तत्वेऽपि जुह्वामुपस्तीर्येति जुहूग्रहणाद्धिरण्यहोमेष्वत्रैव आज्येनोपस्तरणाभिघारणे। अन्येषु शतकृष्णलादिषु आज्येनोपस्तरणाभिघारणे न भवत इति ख्याप्यते।

(वपायामवदानमन्त्रविरहोपपत्तिः)

नावदान-न्निवृत्तिः - माभेर्मा संविक्था इति खण्डितशेषैकदेशप्रकाशकत्वात् वपायां खण्डनाभावात् नावदानमन्त्रः। अतोऽन्यत्राप्येककपालादिषु सर्वहुतेषु नावदानमन्त्रः।

विंशी खण्डिका

(पञ्चावत्ततोपपत्तिः उपदेशपक्षश्च)

(भा) शकलाभ्यां सह पञ्चावत्ता चतुरवत्तिनोऽपि वचनात् स्रुवेण वावदानम्। वपावदानं हस्तेनेत्युपदेशः।

(भाष्योक्तोपपत्तिविवरणम्)

(वृ) शकलाभ्यां वचनात् - हिरण्यशकलानामपि होमद्रव्यतयाऽवदेयत्वात् सर्वेषां पञ्चावदानमेव। चतुरवत्तिनोऽपि हिरण्यशकलयोरनिवृत्तेः।

(स्रुवेणावदानमित्यत्र हेतुः)

स्रुवेणावदानमिति - सान्नाय्यधर्मत्वात्। खण्डनाभावान्न स्वधितिना। हिरण्यशकलयोरवदानं हस्तेन असान्नाय्यविकारत्वात् कठिनद्रव्यत्वाच्च।

(उपदेशपक्षाशयः)

वपाव-शः- साकम्प्रस्थायीये दोहयोः कृत्स्नहोमे स्रुनानन्वयात्। स्रुवस्वधितिहस्तानां शक्तितो व्यवस्थानात् द्रव्ययुक्तचोदनाभावाच्च। पूरोडाशविकारेऽपि हस्तेनैव।

१५.धनुश्चह्नान्तर्गतो भागो अस्माभिस्संयोजितः (सं)

१६.स्वर्गजनकः । (मीमांसाकौस्तुभे द्वितीयाध्यायस्यद्वितीयपादे स्वर्गस्य जन्यत्वेन इति पाठः वर्तते।)

१७. मातृकायां सकलधात्वर्थनामत्वोपपत्तेः इति पाठः विद्यते। मीमांसाकौस्तुभे पाठभेदो वर्तते। सर्वनामधेयत्वापत्तिः।

१८. अत्र "न" इति पदं योजयितव्यम्।

१९. पू. मी. द. १०-१-८

२०. तद्वाक्यस्थयजेर्सर्वोपलक्षणार्थत्वे प्रमाणाभावाच्च ज्योतिष्टोमपदे एकदेशप्रवृत्तिनिमित्तत्वाङ्गीकारस्यायुक्तत्वाच्च। अत्र कौस्तुभस्था एका पंक्तिः तस्यां पाठभेदो उपलभ्यते।

२१. कौस्तुभे गुणात् इति पाठः वर्तते।

२२. पू.मी.द. चतुर्थपादे द्वादशाधिकरणम् ४-४-१२

२३. मनुरुद्ध्य इति साधु।

२४. कौस्तुभे पाठभेदः ज्ञानविषयत्वादिवत् । इति।

२५. अतश्च इति कौस्तुभे

२६. अत्र कौस्तुभस्था एका पङ्क्तिरुत्सृष्टा।

२७. पदभेदात् इति कौस्तुभे

२८. कारणीभूत इति कौस्तुभे

२९. साङ्कर्यापत्तिः इति कौस्तुभे

३०. मीमांसाकौस्तुभे द्वितीयाध्याये द्वितीयपादे अभ्यासाधिकरणे अत्र ईषत्पाठभेदः पाराथमिकत्वेन समिद्वाक्ये कर्मविधिरितरत्र तदनुवादे उपलभ्यते न गुणविधिः इति विनिगन्तुं शक्यत्वादिति पार्थसारथिभवश्चेति।

३१. मीमांसा कौस्तुभे "तनूनपादादिपदेष्वप्यविशिष्टमिति।

३२.रूप इति कौस्तुभे

३३. अत्र धनुश्चिह्नमस्माभिः दत्तम्।

३४. अप्राप्तावपीति साधु ।

३५. अष्टाध्यायी १-१-३९

३६. अष्टाध्यायी २-४-८२

३७. पूर्वमीमांसायां द्वितीयाध्याये द्वितीयपादे पौर्णमास्याधिकरणे सिद्धान्तसूत्रम्।
लिङ्गदर्शनाच्च। अष्टमं सूत्रम्।

३८.मीमांसाकौस्तुभे वक्ष्यमाणसिद्धान्तरीत्यैव।

३९. पू.मी.द. ६-५-२ , यद्युद्गाता अपच्छिन्दादक्षिणं न यज्ञमिष्ट्वा।

४०. यागैकत्वमिति साधु।

४१. कौस्तुभस्थापंङ्क्तिः - विषमशिष्टविकल्पानुपपत्तेः नियमविध्ययोगात् , कौस्तुभे
अतः सतिद्यागे स्वाहाकारयागेवावान्तराधिकाराख्यप्रकरणेन सर्वेषां
याज्यामन्त्राणामङ्गत्वावगतेः, तद्बलेनमान्त्रवर्णिकसमिदादिमात्रदेवताकल्पनं नानुपपन्नम्
इति।

४२.पू.मी.द. ६-५-२०

४३. द्वितीयाध्याये द्वितीयपादे तृतीयाधिकरणम्, पौर्णमास्याधिकरणम्। २-२-३

४४.पू.मी. २-३-१३

४५. पू.मी. ३-१-१३

४६. अत्र "याज्या" पदं मातृकायां नास्ति।

४७. गौरवादिति क्लेशानुभाव्यात्  इति मातृकायाम्।

४८. एकत्रैव इति मातृकायाम्।

४९.संस्कारः विध्यं.........इति मातृकायाम्।

५०.समुच्चयासम्भवात् इति मातृकायाम्।

५१. कालयोगिषु इति मातृकायाम्।

५२. आज्यभागानां इति मातृकायाम्।

५३.धातूनाम् इति मातृकायाम्।

५४. कालयोगाभावेऽपि इति मातृकायाम्।

५५. समदायिद्वय इति मातृकायाम्।

५६. पू.मी.द. २-३-१३

५७. पू. मी. द. ४-४-८

५८. पू. मी. द. ८-१-१५

५९.मातृकायां विना इति पदं नास्ति।

६०. गुणान्तर्भावापत्तेः इति मातृकायाम्।

६१. एक एवायं नियमः इति स्यात्।

६२. भेदकल्पने इति मातृकायाम्।

६३.पू.मी.द. २-२-३

६४. पू.मी.द. ४-४-११

६५. पू.मी.द. ३-१-१२

६६. पू.मी.द. ४-१-५

६७. पू.मी.द. १०-७-३

६८. पू.मी.द. ३-१-१७

इदं पदमस्पष्टार्थम्, शास्त्रदीपिका संख्यायास्संख्येयत्वबोधनेन इति मातृकायाम्।

* * *

# न्यायपद्मस्थमूलश्लोकानुक्रमणिका

श्लोकाः

१. विधाने वानुवादे वा यागः करणमिष्यते।
श्रौतव्यापारनानात्वे शब्दानामतिगौरवम्।
२. एकोक्त्यवसितानां तु नार्थाक्षेपो विरुद्ध्यते॥
तत्समीपे तृतीयान्तः तद्वाचित्वं न मुञ्चति॥
३. विशिष्य फलसम्बन्धबोधाभावे हि कर्मणि।
न प्रवर्तयितुं शक्यो विधिना पुरुषौजसा॥
४. सोमवाक्ये सरूपत्वात् यदि यागविधिस्ततः।
विधेः प्रवर्तनात्वस्य निर्वाहो नाञ्जसा भवेत्॥
५. विशिष्यफलसम्बन्धो न हि तत्रावगम्यते।
अतः प्रवर्तनात्वं तु सम्यक् साधयितुं विधेः॥
६. नीरूपेऽपि स्वर्गकामवाक्ये यागविधिर्मतः।
७. विधि स्पृशो भावनायाः भाव्यकांक्षा भवेत्पुरः॥
इतिकर्तव्यताकांक्षा पश्चादेवोपधायते।
८. अतो विशिष्य भाव्याप्तिबोधके यागचोदना॥
अयुक्तानन्तराकांक्षा गौरवाद्भाव्यबोधके ।
तस्माद्यागविधिर्वाक्ये स्वर्गकामपदान्विते ।
९. आन्यपर्येणरहितमसकृच्छ्रवणं विधेः।
अभ्यासमाहुस्तन्त्रज्ञास्ततो भेदोऽत्र कथ्यते॥
१०. समिदादो विधिरसावप्रवृत्तप्रवर्तकः।
आवृत्तः पञ्चकृत्वोऽत्र पञ्च यागानुदञ्जयेत्॥
११. नामृष्यति धर्मकत्री सा भावना बहवोऽनुरागवार्ताम् ।
:ां धात्वर्थएकां स हि शास्त्रवश्यः ॥

१२. धातूनामप्यभिन्नानां तनयानामिव स्वयम्।
बहुश्रुतः पितेवासौ अर्थान्विभजते विधिः ॥

१३. तत्र पूर्ववदभ्यासात्कर्मान्तरविधायिता।
प्रकृतेज्यानुवादत्वे ह्यानर्थक्यं प्रसज्यते ॥

१४. लट्संशयो यदाग्नेयादिवन्नेति पृथक्स्तुतेः।
विध्यन्तरैकवाक्यत्वाभावाल्लेट्त्वं हि कल्प्यते ॥

१५. वाक्यसार्थसार्थक्यलाभाय ज्ञायमानो विधिः पुनः
यच्छब्दान्नविभेत्येव यदाग्नेयादिवाक्यवत् ॥

१६. यच्छब्दैवं पदग्रासाद्वर्तमानापदेशतः।
न विद्वद्वाक्ययोर्न्याय्याकर्मान्तरविधायिता ॥

१७. न चाप्राप्तार्थकत्वेन लेटत्वं कल्पयितुं क्षमम्।
प्राप्ताग्नेय्यादिषड्यागानुवादत्वस्य सम्भवात् ॥

१८. तस्माद्विधेरिहाभावान्न विध्याभ्यासतो भिदा।
न च तद्वाक्यसार्थक्यलाभाय विधिकल्पनम् ॥

१९. समुदायानुवादेन तत्सार्थक्य सम्भवात्।
समुदायाकृतिश्चैषा यागानां कालयोगिनाम् ॥

२०. षण्णामेव फलप्राप्तिकरणात्स प्रयोजना।
षण्णामेव फलप्राप्तिरिति च प्रागवर्णयम् ॥

*************

# न्यायपद्मे उद्धृतानां ग्रन्थकर्तॄनां सूचीपत्रम्

| ग्रन्थकर्ता | ग्रन्थस्यनामा |
|---|---|
| | मीमांसाकौस्तुभः |
| भवदेवः | तौतातिमतिलकः |
| पार्थसारथिमिश्रः | शास्त्रदीपिका |
| पार्थसारथिमिश्रः | मयूखमालिका |
| कुमारिलभट्टः | तन्त्रवार्तिकम् |
| आपदेवः | न्यायप्रकाशः |
| रामाण्डारवृत्तिः | |
| ताण्ड्यमहाब्राह्मणम् | |
| मैत्रायणीयसंहिता | |
| भट्टोजिदीक्षितः | सिद्धान्तकौमुदी |

%%%

## मीमांसान्यायपद्मप्रसङ्गादुधृतानां श्रुतिस्मृतिन्यायाधिकरणानां विधिवाक्यानं च वर्णानुक्रमेण सूचीपत्रम् ॥


| पृष्ठम् | विषयवाक्यानि -श्रौतसूत्राणि -शाखान्तरवाक्यानि-न्यायाः | मीमांसा अध्यायः-पादः-अधिकरणम् |
|---|---|---|
| ४-७ -६४ | आघाराग्निहोत्राधिकरणम् | २-२-१३ |
| २०९ | अर्धबहिर्वेदिमिनोति | २-२-५ |
| ४५-४६ | अर्धमन्तर्वेदिमिनोति | ३-१-१५ |
| ४५-४६(II Vol) | अर्धबहिर्वेदिमिनोति अर्धमन्तर्वेदिमिनोति | |
| ५७-५८ | ........................ | ३-७-६ |
| २१२ | ........................... | ३-७-२२ |
| | | ५-४-५ |
| २२८ | ............................ | ६-१-६ |
| २०० | ........................ | ६-४-१,६-४-६ |
| २१६ | ................................ | १०-५-८ |
| १२ | ............................ | ११-२-१ |
| ४६५ | ........................... | ४-२-२ |
| | श्येनानभिचरन्यजेत | १-४-५ |
| | आपस्तम्बश्रौतसूत्रम् | २२-४-१३ |
| ७७ | सन्निधानविशेषे विशेषदसंभवेत्तदङ्गानाम् | ३-६-२० |
| | दृतिर्नवनीतमाज्यं भवति | ४-२-२ |
| | स्वरोच्छेदाद्यप्रयोजकताधिकरणम्- | |

| | | |
|---|---|---|
| | स्वरुणापशुमनक्ति - विधिवाक्यम् | |
| | आश्विनं गृहीत्वात्रिवृता यूपं परिवीय | |
| २६ | आग्नेयं सवनीयपशुमुपाकरोति | ३-६-७ |
| | उपाकरणादीनां अग्नीषोमीयधर्मत्वाधिकरणम् | २-२-१ |
| १-८ | शब्दान्तराधिकरणम् | |
| ७३ | चतुरवत्ती यजमानः पञ्चावत्तैववपाकार्या | |
| | पञ्चावत्तायाः-सर्वसाधारणव्याख्याधिकरणम् | १०-७-१८ |
| २५०-२६० | आपस्तम्बश्रौतसूत्रम् | ७-६-२० |
| २० | अग्नीषोमाभ्यामाज्यभागौ यजति - | |
| | आज्यभागस्यारादुपकारकत्वाधिकरणम् | १०-१-८ |
| २९४ | अग्नेयेदात्रे अग्नये पवमानाय | |
| २४९ | अग्नयेदात्रे पुरोडाशमष्टाकपालम् निर्वपे- | १०-४-१५ |
| | दिन्द्रायप्रदात्रे पुरोडाशमेकादशकपालं | |
| | निर्वपेत् | १२-२-७ |
| १५० | ज्योतिष्टोमे दीक्षणीयादीनां अङ्गताधिकरणम् | ४-४-१२ |
| ६४ | समिधो यजति- तैत्तिरीयसंहिता | १-४-४ |
| | | २-६-१.१ |
| | तैत्तिरीयब्राह्मणम् | ३-५-५ |
| | यज्जुह्वांगृह्णाति प्रयाजेभ्यस्तत् | |
| | सर्वस्मै वा एतद्यज्ञायगृह्णतो | |
| | यत्ध्रुवायामाज्यम् | |
| ९-१६ | अभ्यासाधिकरणम् | २-२-२ |
| | अष्टाध्यायिसूत्रम् | |
| | कृन्मेजन्तः | २-४-८२ |

| | | |
|---|---|---|
| | अव्ययादाप्सुपः | १-१-३८ |
| | समिधो यजति | २-६-१ |
| | ग्रन्थकर्तृनामानि | |
| | भवदेवः | |
| | | |
| १६-३८३ | तौतातिमततिलकः | २-२-७ |
| | पौर्णमास्याधिकरणम् | |
| | लिङ्गदर्शनाच्च- सूत्रम् | २-२-८ |
| | | |
| | अपच्छेदन्यायः | ६-५-२ |
| | विधिवाक्यम् | |
| | चतुर्दशपौर्णमास्यामाहुतयो हूयन्ते | १०-८-१७ |
| | त्रयोदशामावास्यायाम् | |
| १२९-१३८ | श्रौतसूत्रम् | ४-१-१५ |
| | अतिहायेडाबर्हिः प्रतिसमानयते | |
| | जुह्वामौपभृतम् | |
| | तेनपुनर्यजेत | ६-५-२० |
| | तैत्तिरीयसंहिता | ६-३-७ |
| | एकादशप्रयाजान् यजति | |
| | | |
| | अथैष ज्योतिः | २-२-८ |
| ९१ | तैत्तिरीयसंहिता | |
| | तदेतद्वैप्रयाजानां मिथुम् | २- ६ - १ - ४ |
| | यस्यैवं विदुषः प्रयाजाःइज्यन्ते | २- ६ - १ - ४ |
| | पौर्णमास्याधिकरणम् | २-२-३ |

| | | |
|---|---|---|
| | सूत्रम् | |
| | प्रकरणं तु पौर्णमास्यां रूपाऽवचनात् | २-२-३ |
| | तैत्तिरीयसंहिता | |
| | यदाग्नेयोष्टाकपालोऽमावास्यायां च | |
| | पौर्णमास्यां चाऽच्युतो भवति | २-६-३-१६ |
| | तैत्तिरीयसंहिता | |
| | तावब्रूतामग्नीषोमावाज्यस्यैव नोपांशुयजन् | |
| | शाखान्तरम् | |
| १२७ | उपाँशुयाजाधिकरणम् | १०-८-१७ |
| १२८ | तैत्तिरीयसंहिता | |
| | ताभ्यामेतमग्नीषोमीयमेकादशकपालं | |
| | पूर्णमासे प्रायच्छत् | २-५-२-१०,१२ |
| | ऐन्द्रं दध्यमावास्यायां | |
| | ऐन्द्रंपयोऽमावास्यायाम् | |
| | तैत्तिरीयसंहिता | |
| | य एवं विद्वान् दर्शपूर्णमासोयजते परमामेव- | |
| | काष्ठां गच्छति | १-६-९-३० |
| ११२ | पशुसोमाधिकरणम् | २-२-३ |
| १६४ | य इष्ट्या पशुना सोमेन वा यजेत | २-३-४ |
| २२ | | ३-६-२ |
| १३४ | | ४-३-११ |
| १६७ | | ५-१-११ |
| २१२ | .................................. | ५-४-७ |
| ३३९ | .................................. | ७-१-१ |

| | | |
|---|---|---|
| ३५१ | ................................. | ७-३-१ |
| १० | ................................. | ८-१-६ |
| १५० | ................................. | ११-२-१ |
| २५२ | ................................. | १२-२-९ |
| २५६ | ................................. | १२-२-१३ |
| १९० | तैत्तिरीयसंहिता २-६-१० | |
| | पञ्चप्रयाजा इज्यन्ते | ५-३-१ |
| | तैत्तिरीयसंहिता पञ्चप्रयाजा इज्यन्ते | |
| | प्रजापतिर्यज्ञानसृजताग्निहोत्रं च | |
| | तैत्तिरीयब्राह्मणम् सर्वस्मै वा | |
| | एतद्यज्ञाय गृह्यते-यद्ध्रुवायामाज्यम् | ३-३५-२६ १-४-४ |
| | वार्त्रघ्न्याधिकरणम् पूर्वमीमांसादर्शनम् | ६५ |
| | अध्यायः | ३-३-५-२६ |
| | तैत्तिरीयसंहिता | २-५-२-१२ |
| | वार्त्रघ्नीपूर्णमासेऽनूज्येते वृधन्वती | |
| | अमावास्यायाम् | २०५ ३-१-३ |
| | तैत्तिरीयब्राह्मणम् | |
| | त्वंह्यग्ने प्रथमो मनोता | ३-५६-९ |
| | मनोतास्थाग्निशब्दवत् | १०, ४-२२, ३-३-७ |
| ३०३ | मनोतामन्त्रस्यविकृतावनूहाधिकरणम् | ४-२२-३-३-७ |
| | मनोतायै हविषोऽवदीयमानस्यानुब्रूहि | ६-३-१० |
| | तैत्तिरीयसंहिता | |
| ५३ | ऋचमनूच्य आज्यभागस्य | |
| | जुषाणेन यजति | २-६-२ , |
| | ऋचमनूच्य हविषा ऋचा यजति | २-६-२-९ |

| | | |
|---|---|---|
| ८०-८७ | संख्याधिकरणम् | २-२-७, |
| | | २-२-३ |
| | फलवत्सन्निधावफलं तदङ्गम् | ४-४-११ |
| | येन कर्मणेर्थ्सेत् तत्र जयान् जुहुयात् | ३-४-१३ |
| | तैत्तिरीयसंहिता | |
| | तत्रजयान् जुहुयात् | ३-४-८ |
| २०५ | गुणानां च परार्थत्वात् | ३-१-१२ |
| | सर्वयज्ञार्थत्वाधिकरणम् | |
| ९० | पशुना यजेत | ४-१-५ |
| | पश्वेकत्वादे विवक्षाधिकरणम् | |
| | पश्वकत्वन्यायः | |
| | तैत्तिरीयसंहिता | |
| | यत्र्यङ्गानां समवद्यति | ६-३ |
| | त्र्यङ्गैस्विष्टकृतं यजति | १०-७-३ |
| ७१ | ज्योतिष्टोमेऽनिज्याशेषिणित्र्यङ्गैः | |
| | स्विष्टकृतं यजति | |
| | स्विष्टकृद्धोमाधिकरणम् | |
| ५४ | ऋत्विग्भ्यो दक्षिणां ददाति | ३-७-१७ |
| २१७ | ऋत्विग्भ्यः दक्षिणादानमानत्यर्थम् | १०-२-८, |
| | | १०-३-११ |
| २५४ | ज्योतिष्टोमेगवामेब द्वादशशतसंख्यान्वयः | १६-१-१० |
| | सामवेदीये ताड्यब्राह्मणे एतद्विधिवाक्यं | |
| | वर्तते। गौश्चाश्वश्चाश्वतरश्चाजा चावयश्च | |
| | तस्यद्वादशशतं दक्षिणा | १०-३-४ |
| | तैत्तिरीयसंहिता | २-२-१२-६ |

| | | |
|---|---|---|
| | किमित्ते विष्णो परिचक्ष्यं भूत्प्रयद्ववक्षे | |
| | शिपिविष्टो अस्मि यः पशो र्भूमा या पुष्टिः | ३-४-१-५ |
| | आकृत्यधिकरणन्यायः | १-३-२२ |
| | पञ्चदशान्याज्यानि | ३-१-६ |
| १५५ | अरुणाधिकरणम् | १-३-९, ३-३-७ |

न्यायपद्मे प्रायशः मैसूर् नगरात् मुद्रितम् भाट्टदीपिका संपुटचतुष्टयात्मकमनुसृत्यैव अध्यायधिकरणपुटपादनिर्देशाः सूचिताः। पुटादयश्च एतदनुशृत्यैवकृतः। केषुचित्स्थलेषु कौस्तुभमनुशृत्यैव पुटादिकं कृतः। केचित् पूना नगरमुद्रित सवार्तिकभाष्यानुरोधेनापि कृतः।

शुभम्